लघुपाराशरी

संस्कृत टीका और हिन्दी-भावानुवाद-सहित

प्रकाशक—

नवलकिशोर-प्रेस, बुकडिपो, लखनऊ.

लघुपाराशरी

(उद्योत, सज्जनरञ्जनी, सुश्लोकशतक टीका)

और

हिन्दी भावानुवाद, परिशिष्टसहित

संपादक,

श्रीगिरिजाप्रसाद द्विवेदी

प्रधान, ज्योतिःशास्त्राध्यापक,

महाराज संस्कृत कालेज, जयपुर

प्रकाशक—

नवलकिशोर-प्रेस, लखनऊ

प्रथम बार] १९४१ [मूल्य ।।)

श्रीकेसरीदास सेठ द्वारा

नवलकिशोर-प्रेस, लखनऊ में मुद्रित

सन् १९४१ ई०

अध्याय-सूची

नाम	पृष्ठ

* वक्तव्य *

यह लघुपाराशरी भारतीय फलित-विद्या का एक सर्वमान्य महत्त्व का ग्रंथ है। इसका पराशरमुनि के सम्बन्ध से आर्षग्रन्था के समान आदर है और भारतवर्ष की चारों दिशाओं में पठन-पाठन का प्रचार है। प्राचीन फलित-ग्रन्थों में बृहज्जातक, बृहत्संहिता, सारावली, सर्वार्थचिन्तामणि आदि के विविध विषयों के विचार, अधिकांश में विश्वासकारक और प्रामाणिक हैं। शेष जितने छोटे-बड़े फलित ज्योतिष के निबंध हैं, वे सब अपने पूर्ववर्त्ती ग्रन्थकारों के मतों के आधार पर रचे गये हैं और इधर-उधर के विभिन्न विषयक श्लोकों के, पर विश्वास पर, संग्रह स्वरूप हैं। इन संग्रह ग्रन्थों की बाढ़ से बहुत गड़-बड़ी मची और जातकस्कन्ध के शुद्ध स्वरूप में, यामलोक्त ज्योतिष का संक्रमण करने-कराने से, एवं ताजिक के लोभ में पड़ने से और इन दोनों से फल किंवा मुहूर्तादि के स्वतन्त्र विचारों को घसीट कर मिला-देने से, फलित की व्यवस्था और उससे आत्मविश्वास को कड़ा धक्का लगा। इन्हीं परंपरागत कारणों से वर्तमान में भारत के प्रान्तों में फलित-सम्बन्धी प्रत्येक विषय के विचारों में वैषम्य उपस्थित है। परन्तु यह प्रवाह सांप्रत में पञ्चाङ्ग के निरयण-सायन के प्रपञ्च के समान कभी मिटता नहीं जान पड़ता। इसके सिवा पाश्चात्य मतानुसार सायनगणनानुकूल फलादेश का विभिन्न विचार भी प्रचार में आ गया है। पर फलितवादियों को इसकी परीक्षा करके एक मत स्थिर नहीं करना है। और यह भी प्रकट है कि कुण्डली-जन्मपत्री के कोई असली-स्वरूप नहीं देखे जाते।

आदि, मध्य और अब प्रायः अंत का स्वरूप विचारने से, विभिन्न निर्माणशैली सिद्ध है एवं किसी प्रामाणिक ग्रन्थ के अनुसार फला-देश के उपयुक्त गणित नहीं रहता। जन्मपत्री क्या वर्षपत्री दोनों में इच्छाचार है। राजपूताना में यवन साम्राज्यकाल से वर्षपत्री का अधिक प्रचार है। यह जिस मत से बनती है वह 'ताजिक' नाम से प्रसिद्ध है। नीलकण्ठी ज्योतिषियों के कण्ठ में लिपटी ही है। प्राचीनकाल में ग्रहगोचरफल और प्रश्न से सब काम चलता था, पर अब उधर दृष्टि नहीं। भारवि कवि ने 'किरातार्जुनीय' काव्य में लिखा है—

'नवैर्गुणैः संप्रति संस्तवस्थिरं
तिरोहितं प्रेम घनागमश्रियः।'

ठीक है। देश-कालानुसार विषयों का आदर होता ही आया है।

अब समय ने भारतीय-संस्कृतपाठशालाओं में परीक्षा पाठ्य को, अन्य विषयों के साथ, ज्योतिष सम्बन्धी भी क्या गणित क्या फलित दोनों को, विकृत और भारभूत कर दिया है। विद्वानों के संकीर्ण विचारों ने सफलता का मार्ग मलिन कर दिया है। इस दशा में अपेक्षित सुधार भी भविष्य के गर्भ में जा छिपा है। पर उचित शास्त्रीय संशोधनों के विना इस समय प्राचीन या, नवीन मतों की स्थिरता नहीं होती। किसी भी विषय के मूल-क्षेत्र का शोधन सदा से—स्वरूप रक्षा के साथ—होता आया है। कालिदास के 'मालविकाग्निमित्र' नाटक की प्रस्तावना में—'पुराणमित्येव न साधु सर्वम्......सन्तः परीक्ष्या-न्यतरद् भजन्ते।' लिखा प्रसिद्ध है। और आचार्य वराहमिहिर भी बृहत्संहिता में कहते हैं—

'प्रायेण सूत्रेण विना कृतानि
प्रकाशरन्ध्राणि चिरंतनानि।

रत्नानि शास्त्राणि च योजितानि
नवैर्गुणैर्भूषयितुं क्षमाणि ॥'

इस आचार्य की हितकारिणी वाणी का पालन होना परमावश्यक है। अस्तु,

यह भारतीय फलितविद्या इस देश के ऋषियों और मुनियों के द्वारा उन की आध्यात्मिक भावनाओं और ज्ञानदृष्टि से आविर्भूत है। सृष्टि के आदि से मानवीय वर्ग की उत्पत्ति के साथ प्राकृतिक घटनाओं का नित्य और नैमित्तिक भाव से शुभाशुभ अथवा. अनुकूल, प्रतिकूल किंवा, सुख, दुःख रूप से प्राणिमात्र से सम्बन्ध चला आता है। प्रकृति में जो कुछ है, जो घटनाएँ होती हैं, उन्हीं का थोड़ा-बहुत फल प्राणियों को अनुभूत होता है, क्योंकि यह विश्व किंवा ब्रह्माण्ड प्रकृति के भीतर ही है, बाहर नहीं। इस बीसवीं शताब्दी के वैज्ञानिक-युग में ऋषियों-मुनियों के आविष्कृत पञ्चभूतों के संश्लिष्ट और विश्लिष्ट नैसर्गिक गुण-धर्म, कार्य-कारण भावों के परिणामों के सूक्ष्म परीक्षण और निरीक्षण द्वारा अभ्रान्त रूप से सिद्ध एवं स्थिरभाव को प्राप्त हैं। इस देश की प्राचीन अर्थात् वैदिकयुग की आकर्षणशक्ति ने अपना सत्य-स्वरूप न्यूटन गणितज्ञ (१६८० ई०) के द्वारा प्रकट करके विज्ञ समाज को चकित किया। पञ्चभूतों की अमोघशक्तियाँ ग्रहपिण्डों के द्वारा मानवदेह अथवा यों कहा जाय कि स्थावर-जङ्गम अजड़-जड़ सबको वशवर्ती किये हैं। दार्शनिक-विचारों के आधार पर, घटनाओं का पूर्वज्ञान करा देना इस फलितविद्या का प्रधान उद्देश्य है। इस में जन्मान्तरवाद के आधार पर, दृष्ट और अदृष्ट दो प्रकार के प्राणियों के शुभाशुभ भोग अदृष्ट (दैव) और पौरुष के समन्वय के साथ हैं। कालपुरुष के अङ्ग होने से ग्रह-नक्षत्रों के संनिवेश वश, दृष्ट किंवा अदृष्ट

दोनों फल ज्ञात होते हैं और अनुकूल-फल साधन के लिए उपाय का भी विचार है। इसी अभिप्राय से बृहस्पति का वचन है—

'स्वभावादेव कालोऽयं शुभाशुभसमन्वितः।
अनादिनिधनः सर्वो न निर्दोषो न निर्गुणः॥'

आचार्य वराहमिहिर भी 'लघुजातक' में कहते हैं—

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पक्तिम्।
व्यञ्जयति शास्त्रमेतत्, तमसि द्रव्याणि दीप इव॥'

अर्थात् जैसे दीपक का प्रकाश अंधकार में वस्तुओं को प्रकट कर देता है अर्थात् उसकी सत्ता को भूमि (आधार) पर दिखा देता है, वैसे ही प्राणियों के जन्मान्तर के कर्मफलों को ग्रहगण, नियमानुसार प्रकट कर देते हैं। इसी अदृष्टवाद के तत्त्व को लेकर आयुर्वेद में भी असाध्य किंवा साध्य रोगों का विधान किया है और रोगों की स्थिति को ग्रहयोगों से प्रकट किया है। आचार्यों ने अनेक श्लोक लिखे हैं। अस्तु, इन पूर्वोक्त विषयों का विचार 'ग्रहलाघव' कर्ता गणेशदैवज्ञ ने भारद्वाजगोत्र-औदीच्य श्री केशवार्क दैवज्ञकृत 'विवाहवृन्दावन' की टीका के आरम्भ में किया है। जिन को आधुनिक वैज्ञानिक रीति से ग्रहों का मानवीय सम्बन्ध जानना हो वे मद्रास के श्री बी० सूर्यनारायण राव बी० ए० लिखित अंग्रेजी निवन्ध * देखें, परन्तु जैसा कि ऊपर लिखा गया है, इन्हीं भारतीय विचारों का ही आधार है। यहाँ यह भी लिखना अनुचित न होगा कि इस समय पाश्चात्य ज्योतिषी भी इस विद्या की सत्यता को जान एवं मान गये हैं और अनेक ग्रंथ लिखे हैं। पञ्चाङ्ग भी फलित का स्वतन्त्र है। युरोप के बड़े फलितज्ञ राफल, स्टेपहर्ड, एलन लिओ प्रसिद्ध हैं। एलन लिओ

* "Introduction to the study of Astrology in the Light of Physical Science", Madras 1903.

(Allan Leo) के एक महानिबन्ध ("Astrology For All") की प्रस्तावना से नीचे एक उद्धरण दिया जाता है—

"It is certain that the truth may be found in this science, if any one will seek laboriously in it without any hate. The result gained from it, no doubt, has proved its highest sentiment and perception of our ancient sages."

अर्थात् अवज्ञा दृष्टि को छोड़कर, परिश्रम से यदि इस विज्ञान की सत्यता को खोजा जाय तो हमारे पूर्वज ऋषियों के उच्चकोटि के विचार और अनुभव, निःसंदेह सत्य प्रमाणित होंगे।

अब विचारणीय यह है कि जिस देश की जो विद्या है, उसकी रक्षा रखना और उसमें समयोचित शोधन करना, उस देश के विवेकी विद्वानों का परम कर्तव्य है। भविष्य में अन्धविश्वास मात्र से निर्वाह कठिन है। भारतीय विद्याएँ सदा से गुरुमुख से ज्ञात की जाती थीं, इस समय के जैसा केवल भाषानुवाद देखकर स्वयं ज्ञाता होने का कोई साधन नहीं था। जैमिनि, पराशर, गर्ग, वसिष्ठ, नारद, कश्यप आदि के सभी ग्रंथ किसी रूप में प्राप्त हैं। इनसे आवश्यक विषयों की परीक्षा के बिना व्यवहार दशा में बहुत धोखा है।

प्रकृत में 'लघुपाराशरी' किसी दूरदर्शी विद्वान् की कृति है। पराशर के नाम से बृहत्संहिता की विवृति में भट्टोत्पल ने आदि में गद्य रूप कई अवतरण दिये हैं, एक 'बृहत्पाराशरहोरा प्रकाशित है, जिसमें पूर्वापर विरुद्ध बहुत अशुद्ध प्रक्षेप आदि हैं, और अमान्य हैं। एक पराशरजातक और सूत्र का भी प्राचीन टीका ग्रंथों में नाम मिलता है। कुछ वर्षों से काशी से एक 'मध्य पाराशरी' भी भाषानुवाद के साथ प्रकट हुई है। इन सबको

देखने से आर्ष, अनार्ष किंवा प्रक्षेप का विवेक एवं पाराशर के वास्तविक मन्तव्यों का ठीक पता ही नहीं चलता। जैसे 'कलौ पाराशरी स्मृतिः' का डंका बजाया गया है वैसे फलित ज्योतिष के लिए कोई वाक्य भी नहीं प्रसिद्ध है। इसीलिए 'सिद्धान्ततत्त्व-विवेक' कर्ता कमलाकर आदि को भावसाधन के प्रपंच को उठाकर 'पराशरो नरः कश्चित् पराशर इवाबभौ' इत्यादि लिखना पड़ा। वृद्धवसिष्ठ और गर्ग के समान वृद्धपराशर भी संहिता और जातक में स्वच्छन्द हैं। इधर 'जैमिनिसूत्र' की दशा भी वृद्ध-कारिकाओं से घिर जाने से संकीर्ण है। इसका विचार 'जैमिनि-पद्यामृत' में महामहोपाध्याय श्री ६ दुर्गाप्रसाद द्विवेदीजी ने किया है, जो बंबई के निर्णयसागर प्रेस से प्रकाशित है। इसकी व्यवस्था और उपयोग में भी अनेक असुविधाएँ हैं, इसीलिए आयुर्दाय और दो, चार सीधी बातें जन्मपत्र में कहीं मिलती हैं, शेष विस्तार का कोई विशेष प्रचार नहीं है।

इस प्रकार दूर तक विचार करने पर, वर्तमान में आर्ष, अनार्ष मतों और वचनों का जातक अर्थात् होरा और संहिता दोनों स्कन्धों में अनर्गल प्रवाह सिद्ध होता है और उसी में भ्रान्त होकर वर्तमान दैवज्ञ विचरण करते हैं। इस दशा में भी बृहज्जातक, सारावली, सर्वार्थचिन्तामणि, होरारत्न और जैमिनिपद्यामृत के पठन और मनन से समस्त विचार किसी रूप में स्थिर होते हैं और छात्रों को भी लाभदायक हैं। जन्मपत्री के फलादेश लिखने को 'जातकाभरण' व्यवस्थित है। आचार्यों ने ग्रहयोगज फल को ही मुख्य माना है, जैसा कि ऊपर के लिखित ग्रन्थों में और इस लघुपाराशरी में है। उसी के साथ स्थानिक इष्टकाल, स्वदेशोदय एवं लग्नशुद्धि के सूक्ष्मतत्त्वों का ज्ञान आवश्यक है, केवल स्टांडर्ड टाइम (standard time) से उपपत्ति सिद्ध अशुद्धि होती है।

जैसा कि पहले वक्तव्य के आदि में भी लिखा है, इस 'लघुपाराशरी' का इस देश में चिरकाल से प्रचार है और पराशर के जातक समुद्र को मथकर चालीस श्लोक रत्न रूप निकाले गये हैं, 'सर्वे पदा हस्तिपदे निमग्नाः' की बात चरितार्थ है। इसपर कई टीका, टिप्पणी यहाँ तक कि नाम बदल कर, दक्षिण देश में दूसरे ग्रंथ तक बने हैं, जो कि मद्रास गवर्नमेंट के हस्तलिखित पुस्तकों के सूचीपत्र * से ज्ञात होता है। और विविध हिन्दी, बंगला, मराठी एवं गुजराती भाषा में अनुवाद होना तो, इस समय स्वाभाविक है। अस्तु, इस चालीस श्लोक के सूत्र-रूप ग्रन्थ का, जैसी कि मर्यादा है, गुरुमुख से पठन आवश्यक है क्योंकि यह उपन्यास नहीं। पर वर्तमान में, केवल भाषा माहात्म्य में पढ़ने से अनर्थ है—इस विचार से प्रामाणिक और आवश्यक अङ्गभूत विषयों से पूर्ण विद्वानों की तीन टीकाएँ मूल ग्रन्थ के साथ लगाई हैं। जैसा—

१—'उद्योत' भैरवदत्तकृत।

२—'सज्जनरञ्जनी'

३—सुश्लोकशतक।

इनमें भैरवदत्त की टीका काशी और बंबई में पहले छपी है और यत्र, तत्र अशुद्ध भी है, यथा संभव शोधन किया गया है। दूसरी 'सज्जनरञ्जनी' सं० १९३२ श्रा० कृ० १ चन्द्रवार, की लिखी है जो संभवतः अभी प्रकाशित नहीं है। यह मेरे मित्र जयपुर के प्रसिद्ध ज्योतिष-यन्त्रालय (वेधशाला) के प्रधान आचार्य पं० श्रीकेदारनाथजी ज्योतिष-साहित्यभूषण ने कृपा करके दी है और इसके विषय में कहा है:—"परमसुखोपाध्याय रचित 'रमलनवरत्न'

---

* "A Descriptive Catalogue of the Sanskrit Mss. in the Government Oriental Library, Madras". By S. Kuppuswami Sastri, M. A. Vol. XXIV (Jyotish) P. 9234.

के संस्कर्ता गोस्वामी रङ्गलालजी के पुत्र, श्रद्धास्पद, पीयूषपाणि पं० प्यारेलालजी गोस्वामी, नारनौल (पटियाला-राज्य) निवासी के पुस्तकालय से चि० फतेचन्दजी ने, जो गोस्वामीजी के पौत्र हैं, मुद्रणार्थ मेरे को दिया है।"

अलवर-राजकोय लिखित संस्कृत पुस्तकों के मुद्रित सूचीपत्र में † भी 'सज्जनरञ्जनी' है और उसके अन्त में जो श्लोक हैं उनसे ज्ञात होता है—कनोज प्रान्त में खोरग्राम के निवासी, भारद्वाजगोत्र, पाण्डे उपनामक, नेपाल राज्यमान्य, कृष्णानन्द के पुत्र लक्ष्मीपति ने इसको बनाई है। अब भी कान्यकुब्जों में 'खोर के पांडे' प्रसिद्ध हैं। इन दोनों पुस्तकों में मङ्गलाचरण और अन्त के श्लोकों में नाममात्र का भेद है। यह लक्ष्मीपति की 'सज्जनरञ्जनी' वास्तव में अपने नाम को सार्थक करती हुई प्रौढ़ता और गुरुपरंपरा के गूढ़ार्थों का भी आदेश करती है।

तीसरी 'सुश्लोकशतक' मिट्ठनलाल कान्यकुब्ज कृत अनुष्टुप्-छन्दों में है। यह भैरवदत्त किंवा लक्ष्मीपति को भी पछाड़ देने-वाली, बहुत ही सारगर्भित एवं सुगमता से कूटार्थों को खोलनेवाली है। इससे विचारों में स्थिरता और विश्वास जमता है। यह टीका पुस्तक मेरे 'सरस्वती-पीठ' जयपुर के पुस्तकालय की है। खेद है कि उक्त तीनों टीकाकारों ने अपने समय का उल्लेख नहीं किया, जैसी कि प्राचीन भारतीय-परिपाटी है। तथास्तु

उक्त तीनों संस्कृत टीकाओं के बाद हिन्दी में भावानुवाद और 'परिशिष्ट' भी लगाया गया है, जिससे साधारण ज्ञानवाले भी

---

† "Catalogue of the Sanskrit Mss. in the Library of H. H. the Maharaja of Alwar". By Peter Peterson, M. A., D. Sc, Bombay 1892.

ऊट-पटांग के अर्थों में न फँसें और पढ़नेवाले छात्रों को भी सहायता मिले। अन्त में आशा है कि फलितविद्या के प्रेमी महानुभाव बड़े किंवा छोटे सभी इस संपादित ग्रन्थ को अपना कर, मेरे प्रयत्न को सफल करने में उदासीन न होंगे।

"सरस्वती-पीठ"
जयपुर.
सं० १९९७ फा० कृ० ८ बुधवार
ता० १९।२।१९४१ ई०

गिरिजाप्रसाद द्विवेदी

श्रीः

लघुपाराशरी

भैरवदत्तसूरिकृतोद्योतसहिता

प्रारभ्यते ।

श्रीलक्ष्मीरमणं गणेशमभयं श्रीमद्गुरुं शारदां
सूर्यादिग्रहमण्डलं सविनयं नत्वा विदां प्रीतये ।
ज्योतिःशास्त्रकलाकुतूहलरतिः तत्तत्प्रबन्धानहं
वीक्ष्योद्योतमिमं तनोमि विशदं दायप्रदीपेऽमलम् ॥

परमसुखमुदारं ज्ञातसच्छास्त्रसारं
विजितभवविकारं व्यक्तमुक्तिप्रकारम् ।
श्रुतिनयनविचारं भूरिशिष्यप्रचारं
गुरुमविनयहारं दृष्टपारं स्मरामः ॥

क्वाहं मन्दमतिः क्व शास्त्रधिषणा साध्यं सतां संमतं
ज्योतिःशास्त्रविविक्तादिष्टजफलं क्वासौ तदर्थोद्यमः ।

तानेव स्मृतिगोचरान् गुरुकृपापीयूषधाराधरान्
मन्ये हार्दकुबोधवह्निबहुलज्वालैकनिर्वापकान् ॥

अथ तावत् पौर्वदेहिकधर्माधर्माधीनजन्मनो जीवजातस्यानागतधर्माधर्मफलविवक्षया नानाजातकशास्त्राणि परमर्षयः प्रणिनिन्युः । तत्र परमकारुणिको भगवान् पराशरः प्रारब्धस्य फलानुमेयतया फलव्यभिचारेऽनुमानव्यभिचारात् पूर्वाचार्याणां ग्रन्थेष्वनुमानानामसत्त्वमालोचयन् जातकविशेषं प्रणिनाय । तमेव जातकविशेषं 'कलौ पाराशरीस्मृतिः' इति न्यायसामान्यादव्यभिचारितफलत्वात् सिद्धान्तं मन्यमान आचार्य उडुदायप्रदीपाख्यं ग्रन्थं चिकीर्षुस्तत्समाप्तिप्रतिबन्धकप्रत्यूहव्यूहाविहतये मङ्गलमाचरति स्म—

सिद्धान्तमौपनिषदं शुद्धान्तं परमेष्ठिनः ।
शोणाधरं महः किञ्चिद्वीणाधरमुपास्महे ॥ १ ॥

सिद्धान्तमित्यादि । सिद्धः शाश्वतो निर्णीतः अन्तो निश्चयो यस्य स तथा तं वयमुपास्महे । इष्टाधिगमहेतुमानसः प्रत्ययप्रवाह उपासना, तद्विषयीकुर्म इत्यर्थः । ननु शास्त्रबहुत्वात् बहवः सिद्धान्ताः, तत्र कतमः सिद्धान्त उपास्यत इत्यत आह—औपनिषदमिति । वेदान्तवाक्यान्युपनिषदस्तत्प्रतिपाद्यमित्यर्थः । ब्रह्मस्वरूपमिति भावः । ननु निर्विशेषं ब्रह्मवेदान्तप्रतिपाद्यं तत्कथमुपासनीयमविषयत्वादित्यत आह—शुद्धान्तं परमेष्ठिन इति । परमेष्ठिनः शुद्धान्तमिति योजना । जगत्स्रष्टा परमेष्ठी तस्य शुद्धान्तमतः परं वाणीरूपमित्यर्थः । शुद्धान्तश्चावरोधश्चेत्यमरः । ननु पूर्वविशेषण-

विशिष्टवाक्यसंदर्शरूपवाण्युपास्यते उतास्त्याकारविशेष इत्यत आह—शोणाधरमिति । शोणा आरक्तोऽधरो यस्य, अधर-शब्दोऽत्र लक्षणयाधरोष्ठबोधको नत्वोष्ठे रूढः । उत्तरोष्ठा-धरोष्ठयोरित्यादावोष्ठपदवैयर्थ्यात् तेन शोणौ रक्तावोष्ठौ यस्येति कस्यचिद्विवरणं परास्तम् । तदनेन साकारता दर्शिता । नन्वेवं प्राकृतत्वापत्तिरत आह—मह इति । तेजोरूपमित्यर्थः । ननु ज्वलनादिः स्यादत आह—किञ्चिदिति । अनिर्वचनीयमित्यर्थः । नन्वात्मानमुपासीते-त्यादिश्रुतेरात्मन उपासनमुचितं मोक्षहेतुत्वात्—तत्किं वाण्युपासनेनेत्यत आह—वीणाधरमिति । मोक्षप्रयोजक-नादहेतुवाद्यविशेषो वीणा तस्या धरं धारकमित्यर्थः । वीणाधारणक्रियाकर्तृत्वेनात्मत्वात्तदुपासनं श्रुतिसिद्धमिति भावः । वीणाशब्देन स्वरतालादिकमुपलक्ष्यते तेन तद्र-सिकत्वोक्त्या मोक्षप्रदत्वं व्यज्यते ।

'वीणावादनतत्त्वज्ञः स्वरजातिविशारदः ।
तालज्ञश्चाप्रयासेन मोक्षमार्गं निगच्छति ॥'

इति याज्ञवल्क्योक्तेः । वीणां दधातीति तु न विग्रहः, कर्मण्युपपदेऽण्प्रत्ययप्रसङ्गेन वीणाधारमित्यापत्तेः । एतेन वीणां दधातीति कस्यचिद्व्याख्यानमपास्तम् ॥ १ ॥

वयं पाराशरीं होरामनुसृत्य यथामति ।
उडुदायप्रदीपाख्यं कुर्मो दैवविदां मुदे ॥ २ ॥

अथ चिकीर्षितस्य ग्रन्थस्य नामनिर्देशश्चिकीर्षितं प्रतिजानीते—वयमिति । बहुवचनमस्मदोद्वयोश्चेत्यत्र चका-

रेणैकस्मिन्नपीत्यस्यानुकर्षणात् । पाराशरीं पाराशरेण प्रोक्ता पाराशरी तां होरां लग्नशास्त्रं लग्नस्यार्धं भवेद्धोरेत्युक्तेर्होराशब्दस्य लग्नार्द्धवाचित्वेऽपि लग्नशास्त्रलक्षकत्वात् । तथा च पाराशरोक्तं शास्त्रमनुसृत्य पर्यालोच्य यथामति अध्ययनभावनाभ्यां परिनिष्पन्नां बुद्धिमनतिक्रम्य उडुदायप्रदीपाख्यं उडवो नक्षत्राणि तेषां दायाः फलानि देयभागस्य दायपदार्थत्वात् । तेषां प्रकाशकत्वात् । प्रदीप इवोडुदायप्रदीपः स आख्या यस्य तं कुर्मो विरचयामः । कस्मै प्रयोजनायेत्यत आह—दैवविदां मुद इति । प्रारब्धं कर्म दैवं तद्विदन्तीति दैवविदस्तेषां मुदे हर्षायेति ॥ २ ॥

फलानि नक्षत्रदशाप्रकारेण विवृणमहे ।
दशा विंशोत्तरी चात्र ग्राह्या नाष्टोत्तरी मता ॥ ३ ॥

अथ नक्षत्रप्रयोज्यफलप्रकाशत्वं ग्रन्थनामनिर्वचनव्याजेन प्रतिज्ञातं तदेव विशदीकरोति फलानीत्यादिना । प्रारब्धवशादवश्यंभावीनि सुखदुःखफलानि तद्धेतुभूतानि राज्यस्त्रीपुत्रधनादीनि च विवृणमहे विवेचयामः । विविच्य प्रकाशयामः । इति यावत्केन प्रकारेणेत्यत आह—नक्षत्रदशाप्रकारेणेति । नक्षत्राधीशा नक्षत्रदशा तस्याः प्रकारो भेदस्तेनेत्यर्थः।ननु दशा द्विविधा—विंशोत्तरी अष्टोत्तरी च तत्रैका दशाग्राह्येत्यत आह—दशाविंशोत्तरीत्यादिस्पष्टोऽर्थः । अथ कश्चिद्योगिनीदशा दिनापि फलं ब्रूयात्तत्प्रतिषेधार्थमाह—नाष्टोत्तरीति । अष्टोत्तरीदशात्र शास्त्रे न ग्राह्या फलव्यभिचारादिति भावः । विंशोत्तरीदशा च ग्रन्थान्तरे—

'तनुनयसितजायातोपि धन्यासटासा ।
नख इति गदिता सा भास्करादिक्रमेणेति ॥'

अत्र कादि नव, टादि नव, पादि पञ्च, याद्यष्टाविति वर्गचतुष्टयं शिवताण्डवादिषु व्यक्तम् तदनुसरणात्तनु शब्देन षट्, नयशब्देन दश, सितशब्देन सप्त, जायाशब्देनाष्टादश, तोपि शब्देन षोडश, धन्याशब्देनैकोनविंशतिः सटाशब्देन सप्तदश, साशब्देन सप्त, नखशब्देन विंशतिः, एते क्रमेण भास्करादीनां दशावर्षा भवन्ति । भास्करादयश्च—

'रविश्चन्द्रः कुजो राहुर्गुरुर्मदो बुधस्तथा । केतुर्भृगुसुतश्चापि दशाधीशा अमी क्रमादिति ॥' ग्रन्थान्तरोक्ताः ।

अत्रास्मदीयः श्लोकः—

'रसदशाद्रिपुराणमहीभृतो
विधुविहीननखा अगभूमयः ।
गिरिनखारविचन्द्रकुजागुयु-
ग्गुरुशनिज्ञककेतुसिताब्दकाः ॥' इति—

दशाज्ञानप्रकारस्तु ग्रन्थान्तरे—

'नयनोनजनुर्भतोऽङ्कहृत्क्रमशोऽर्केन्दुकुजागुसूरयः ।
शनिचन्द्रजकेतुभार्गवाःपरिशेषास्तुदशाधिपाःस्मृताः'इति।

अयमर्थः नयनाभ्यां द्वाभ्यां ऊनं यज्जनुर्भं जन्मनक्षत्रं तत्र नवभिः हरणकर्ता यः क्रमेण क्रमेणेत्यर्थः । अर्थात्कृत्तिकामारभ्य गणनायामर्कादिक्रमप्राप्तो यो जन्मनक्षत्रे ग्रहस्त-

स्यैव दशा जन्मदशा भवति। तथा च कृत्तिकोत्तराफाल्गुन्युत्तराषाढासु जन्मवतो रवेर्दशा षड्वर्षभोग्या भवति। तदुत्तरेषु नक्षत्रेषु चन्द्रमसो दशा दशवर्षभोग्या भवतीत्यादि रीत्या दशा ज्ञातव्या।

अत्राप्यस्मदीयः श्लोकः——

'कृत्तिकादिनवकात्रिके क्रमात्सूर्यचन्द्रकुजराहुमन्त्रिणः।
सौरिसोमसुतकेतुभार्गवा भवप्रवर्तितदशाब्दनायकाः' इति॥

तत्र भुक्तायाः दशायाः प्रयोजनाभावाद्भोक्तव्यायाः फलं वाच्यम्।

तदुक्तं लघुजातकाभरणे——

'निजजन्मनि यादिमा दशा जनिभस्यैतघटी समाहता।
सकलर्क्षघटीविभाजिता जनि भुक्तादिदशा मता ततः।
अवशिष्टदशाफलं वदेत्परिशेषेषु यथोक्तवर्षकैः' इति॥

अयमर्थः स्वस्य जन्मनो या प्रथमा दशा षड्वर्षादिरूपा सा जन्मनक्षत्रगतघटीभिर्गुणनीया तत्र जन्मनक्षत्रसकलघटीभिर्भागतो यल्लब्धं तदेव भुक्तदशा भवति, यदवशिष्टं सा भोक्तव्या भवति। भुक्तवर्षैर्दशावर्षेषु भागे यत्परिशिष्टं तेषु सर्वेषु फलं वाच्यम्। अयं भुक्तभोग्यविचारोऽन्तर्दशाज्ञानार्थः।
भुक्तभोग्यज्ञानाभावे दशामात्रफलवचनसंभवेऽप्यन्तर्दशाफलवचनासम्भवात्। अतः सूक्ष्मदशाज्ञानार्थमन्तर्दशाद्यानयनमावश्यकम्। तत्प्रकारस्तु ग्रन्थान्तरे——

'स्वदशा रामगुणिता तद्दशा गुणिता पुनः ।
खरामभागतो लब्धं फलं मासादिकं भवेत् ॥'

यद्दशामध्येऽन्तर्दशा समानेया सा त्रिगुणिता यः पिण्डो भवति तं ध्रुवं कृत्वा तत्तद्दशाभिर्गुणयेत्तत्र च त्रिंशता भागे हृते यल्लब्धं तन्मासादिकं बोद्धव्यम् । यथा सूर्यदशायां सूर्यान्तर्दशा समानेया तत्र सूर्यदशात्रिगुणिता १८ अष्टादश-रूपा अयमेव पिण्डः । सूर्यदशावर्षैः षड्भिर्गुणितोष्टोत्तरं शतं १०८ तत्र त्रिंशता भागे लब्धास्त्रयस्ते मासा भवन्ति । अवशिष्टा दश तानि दिनानि भवन्ति । तथा चाष्टादशदिना-धिकास्त्रयो मासा रवेरन्तर्दशा भवति । एवमष्टादशात्मकः पिण्डो यदि चन्द्रदशया गुणयते तदा षट् ६ मासाश्चन्द्रमसो-ऽन्तर्दशा भवति ।

अनया रीत्या चत्वारो मासा षट् दिनानि भौमस्य, दश मासाश्चतुर्विंशतिदिनानि राहोः, नवमासा अष्टादश-दिनानि गुरोः, एकादशमाशा द्वादशदिनानि शनेः, दश-मासा षट् दिनानि बुधस्य, चत्वारो मासा षट् दिनानि केतोः, वर्षमेकं शुक्रस्येति, इति रविदशामध्ये रव्याद्यन्तर्दशा-निरूपणम् ।

एवमेव चन्द्रादिदशामध्ये चन्द्राद्यन्तर्दशानयनं प्रका-रान्तरञ्च ।

'रामैर्हताश्चार्कमुखग्रहाणां दशाब्दकास्ते दिवसा भवन्ति ।
दशासमानां खलु षष्ठभागः शुक्रस्य भुक्तिः सकलग्रहेषु ॥
दशेश्वरादिनैर्हीना शुक्रभुक्तिर्भवेच्छनेः ।

सैव हीना दशानाथदिनैश्चागोः स्मृता हि सा॥
रहिता चैव सा ज्ञेया चन्द्रजस्य तु तैर्दिनैः।
एवं हीना च सा ज्ञेया दशानाथदिनैर्गुरोः॥

अगोस्त्रिभागं रविभुक्तिमाहुः
शुक्रस्य चार्धं हिमगोर्भवेत्सा।
युता दशानाथदिनैरवेस्तु सा,
भुक्तिर्भवेच्चैव कुजस्य केतोः॥

एवं समस्तग्रहभुक्तयस्तु कार्या दिनेशादिखगेश्वराणाम्॥'

अयमर्थः सकलग्रहाणां दशादेः षष्ठांशः शुक्रस्यान्तर्दशादिः, अयं दशेश्वरदिनैर्हीनः शनेः, सोऽपि दशेश्वरदिनैर्हीनो राहोः, अयमपि तैरेव हीनो बुधस्य, बुधस्यापि तैर्दिनैर्हीनो गुरोः, राहोस्तृतीयांशः सूर्यस्य, दशेश्वरदिनैर्युक्तोऽयं भौमस्य, अयमेव केतोरिति।

अत्रापि सूक्ष्माकांक्षायां विदशानयनं कथं कर्तव्यम्। तत्प्रकारो ग्रन्थान्तरे—

'भृगोर्नखांशैर्विदशा विधेया
रीत्योक्तया वै रविजादिकानाम्।
भृगोस्तु षष्ठांशमुशन्ति तज्ज्ञा
राहोस्त्रिभागं रविभुक्तिरेवम्॥
अर्धं भृगोः स्याद्रजनीकरस्य
कुजस्य केतोश्च पुरेव साध्या।'

अयं भावः—ग्रहाणामन्तर्दशादेः षष्ठांशो भृगोर्विदशा एषा नखांशैर्हीना शनेरित्यादि पूर्ववत् ।

अस्मद्गुरुचरणास्तु उक्तेषु प्रयासगौरवं क्रमव्यत्यासं च मत्वा सुगमं प्रकारमाहुः । तथाहि—

'स्वैः स्वैर्दशाब्दैर्गुणितं दशादिवर्षादिकं विंशतियुक्शतेन ।
भवेच्च लब्धं तु निजान्तरान्तर्दशादिमानं कथितं ग्रहाणाम् ॥'

अयमर्थः यस्य दशायामन्तर्दशा नेया तद्दशावर्षादिकमानीय ग्रहदशावर्षादिभिर्गुणयेत् । यथा रविदशायां रवेरन्तर्दशा नेया तत्र रविदशाब्दे रविदशाब्दगुणे षट्त्रिंशत् ३६ तेषां महा दशाब्दैर्भागानर्हत्वाद्द्वादशभिर्गुणयेत् तदा द्वात्रिंशदुत्तरं चतुः-शतं ४३२ तत्र विंशत्युत्तरशतेन भागे लब्धास्त्रयस्ते मासा भवन्ति शिष्टाद्द्वासप्ततिस्तांस्त्रिंशता गुणयित्वा महा-दशाब्दैर्भागे लब्धा अष्टादश १८ ते दिवसाः । एतावती सूर्यदशायां सूर्यस्यान्तर्दशा भवति । एवं सूर्यदशावर्षात् चन्द्रदशावर्षैर्गुणयेत् तत्पूर्ववद्भागादिक्रमेण चन्द्रमसोऽन्तर्दशा भवति तथा भौमादीनामपि । इति भागयोगत्वार्थं वर्षाणि द्वादशभिर्गुणयेन्मासा भवन्ति, मासांस्त्रिंशता गुणयेद्दिनानि भवंति, तान्यपि षष्ठ्या गुणयेत् घटिका भवन्ति, एवमग्रेऽपि ।

तदिदमाहु :—

'दशा चान्तर्दशा चैव विदशोपदशा तथा ।
प्राणाख्या च फलं तासां वदेच्छास्त्रानुसारतः' ॥६॥

अथास्मिन् शास्त्रे यत्र विशेषोनोपदिश्यते तत्सामान्य-शास्त्रतो ज्ञातव्यमित्याह—

बुधैर्भावादयः सर्वे ज्ञेयाः सामान्यशास्त्रतः ।
एतच्छास्त्रानुसारेण संज्ञां ब्रूमो विशेषतः ॥४॥

बुधैरिति । ज्योतिःशास्त्रविज्ञैरित्यर्थः । भावादयः भावा आदयो येषां ते । भावाश्च तनुधनसहजसुखसुतरिपुजायामृत्युधर्मकर्मायव्ययाख्याः । आदि शब्दाद्राश्यादयः ते च मेषवृषमिथुनकर्कसिंहकन्यातुलावृश्चिकधन्विमकरकुंभमीनाख्या एषां स्वभावाश्च । सर्वे इति । अत्रानुक्तविचाराययुक्ताः सर्वे पदार्थाः सामान्यशास्त्रतः यवनाचार्याद्युक्तजातकशास्त्राज्ज्ञेयाः ज्ञातव्याः । ग्रहाणां स्वभावाः तत्फलानि चेत्यर्थः । तत्र रव्यादयो ग्रहाः तेषां स्वभावा दीप्तत्वादयस्तदुक्तम्—

'दीप्तः स्वस्थः प्रमुदितः शान्तो दीनोऽतिदुःखितः ।
विकलश्च खलः कोपी नवधा खेचरो भवेत् ॥
उच्चस्थः खेचरो दीप्तः स्वस्थः स्वपतिमित्रभे ।
मुदितो मित्रभे शान्तः समभे दीन उच्यते ॥
शत्रुभे दुःखितोऽतीव विकलः पापसंयुतः ।
खलः खलग्रहे ज्ञेयः कोपी स्यादर्कसंयुतः ॥
पृथक् पृथक् फलं तेषां दशापाके विशेषतः ।
उत्तमाद्यनुरोधेन फलपाके वदन्ति हि ॥'

इत्यादि । फलं त्वग्रे वक्ष्यामः । एतच्छास्त्रानुसारेणेति अस्मिन्पाराशरे शास्त्रे काचित्संज्ञा सामान्यशास्त्रीय संज्ञापेक्षया भिन्नास्ति, तां विशेषतः विशेषरूपेण ब्रूमः, अनुपदं वक्ष्यामः । वर्तमानसामीप्ये वर्तमानवद्वेतिसूत्रबलात्

वर्तमानवत्प्रत्ययो द्रष्टव्यः ॥ ४ ॥ अस्मिन् शास्त्रे यो विशेषस्तमाह—

पश्यन्ति सप्तमं सर्वे शनिजीवकुजाः पुनः ।
विशेषतश्च त्रिदशत्रिकोणचतुरष्टमान् ॥ ५ ॥

पश्यन्तीति । सर्वे रव्यादयो ग्रहाः सप्तमं पश्यन्ति स्वाधिष्ठितस्थानात्सप्तमं स्थानं तत्संस्थं ग्रहं च पश्यन्ति । यद्यपि सामान्यशास्त्रादिदमपि ज्ञातुं शक्यं तथापि चरणदृष्टिप्रतिषेधार्थमिदं, पूर्णदृष्टिं ज्ञात्वैव दृष्टिफलं वाच्यं नतु चरणदृष्ट्यापीति भावः । विशेषान्तरमाह—शनिजीवकुजाः पुनरितित्वर्थे शनिजीवकुजास्तु क्रमेण त्रिदशत्रिकोणचतुरष्टमान् चाप्यर्थेऽपि पश्यन्ति । अयमर्थः शनिस्तावत्त्रिदशं तृतीयं दशमं चकारात्सप्तमं स्थानं पूर्णमेव पश्यति, जीवः त्रिकोणपदवाच्यं पञ्चमं नवमं सप्तमं च पूर्णं पश्यति, कुजश्चतुर्थमष्टमं सप्तमं च पूर्णमेव पश्यति । इदमपि चरणदृष्टिप्रतिषेधार्थं, अन्यथा सामान्यशास्त्रत एव दृष्टिलाभे पुनर्दृष्टिविधानवैयर्थ्यात् ।

त्रिदशं च त्रिकोणं च चतुरष्टमं चेतिविग्रहः, तेन शनिजीवकुजानां क्रमेणान्वयः। यद्यपि त्रयश्च दशचेति विग्रहकरणात् यथासंख्यासंभवेन सर्वत्रैव शनिजीवकुजानामन्वयः संभवति तथापि अविवक्षितत्वान्न तथान्वय इति संप्रदायविदः ॥ ५ ॥

अथ शुभग्रहाणां शुभफलप्रदत्वमशुभग्रहाणामशुभफलप्रदत्वमिति सकलशास्त्रसिद्धं तत्र बुधगुरुशुक्रा अक्षीणचन्द्रश्च शुभग्रहाः रविकुजमन्दा राहुकेतुक्षीणचन्द्राश्चाशुभग्रहाः, इति सामान्यशास्त्रं तस्यापवादार्थमाह—

सर्वे त्रिकोणनेतारो ग्रहाः शुभफलप्रदाः।
पतयस्त्रिषडायानां यदि पापफलप्रदाः॥ ६॥

सर्व इति। नवपञ्चमयोस्त्रिकोणसंज्ञा नतु नवमपञ्चमराश्योर्नेतारोऽधीश्वरा ग्रहास्ते सर्वे शुभफलदायका भवन्ति। त्रिकोणाधीशत्वेन सप्तानामेव ग्रहाणां शुभत्वम्। एवं तयो राहुकेत्वोर्ग्रहयोराश्यनधीशत्वान्न ग्रहणम्। तेन नवग्रहा इति कस्यचिद्व्याख्यानमपास्तम्। अशुभग्रहा अपि त्रिकोणनेतृत्वेन निमित्तेन शुभग्रहा भवन्ति। शुभग्रहास्तु कैमुतिकन्यायेन शुभतरा इति भावः। यदि सप्तैव ग्रहास्त्रिषडायानां तृतीयषष्ठैकादशानां पतयः स्युस्तदा पापफलप्रदा एव। त्रिषडायपतित्वेन निमित्तेन शुभग्रहा अपि पापग्रहा एव भवन्ति किमुत पापग्रहा इति भावः। अत्र त्रिकोणनेतारो यदि त्रिषडायानां पतयः इति योजनां केचिद्वर्णयन्ति तन्न त्रिकोणनेतुस्त्रिषडायनेतृत्वासंभवात्। संभवे वा सकलफलविरोधादविवक्षितत्वात्।

राश्यधीशास्तु ग्रन्थान्तरे—
'मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाधिपः।
बुधः कन्यामिथुनयोः कर्काधीशस्तु चन्द्रमाः॥
धनुर्मीनाधिपो जीवः शनिर्मकरकुंभयोः।
सिंहस्याधिपतिः सूर्यो राश्यधीशा इमे स्मृताः' इति॥ ६॥

अथापरं विशेषमाह—

न दिशन्ति शुभं नृणां सौम्याः केन्द्राधिपा यदि।

क्रूराश्चेदशुभं ह्येते प्रबलाश्चोत्तरोत्तराः ॥ ७ ॥

न दिशन्तीति । सौम्याः शुभग्रहाः चन्द्रबुधशुक्राः यदि केन्द्राधिपतयः लग्नचतुर्थसप्तमदशमपतयः स्युस्तदा शुभफलं न दिशन्ति न प्रयच्छन्ति । शुभा अपि केन्द्राधिपतित्वेन निमित्तेन अशुभमेव कुर्वन्तीत्यर्थः । क्रूराश्चेदिति, चेद्यदि क्रूरा अशुभत्वेनाख्याताः सूर्यभौमशनयः केन्द्रपतयः स्युस्तदा अशुभं न दिशन्ति । अशुभा अपि केन्द्राधिपतित्वेन निमित्तेन शुभमेव दिशन्ति प्रयच्छन्तीति भावः ।

अथैषां बलाबलमाह--

एते त्रिकोणपतयस्त्रिषडायपतयः केन्द्रपतयश्च उत्तरोत्तरं प्रबला बलवन्तो भवन्ति पञ्चमेशनवमेशयोर्मध्ये नवमेशः प्रबलः । तथा तृतीयेशात्षष्ठेशः प्रबलः, षष्ठेशादेकादशेशः प्रबलः, एवं लग्नेशाच्चतुर्थेशः प्रबलश्चतुर्थेशात्सप्तमेशः प्रबलः, सप्तमेशाद्दशमेशः प्रबल इति बोध्यम् । तथा च यो ग्रह उक्तरीत्या बलवांस्तस्यैव फलं वाच्यं नान्यस्येति भावः । अत्र त्रिकोणाधिपत्रिषडायाधिपयोर्मध्ये त्रिषडायाधिप एव प्रबलस्तथापि केन्द्राधिपः प्रबलः । कथनक्रमे उत्तरत्वादिति विवेकः ॥ ७ ॥

अथ सम्बन्धवशादपि ग्रहाणां शुभाशुभफलप्रदत्वमाह—

लग्नाद्व्ययद्वितीयेशौ परेषां साहचर्यतः ।
स्थानान्तरानुगुण्येन भवतः फलदायकौ ॥८॥

लग्नादिति । लग्नं प्रसिद्धं जन्मलग्नमारभ्य गणनया व्ययद्वितीयेशौ द्वादशद्वितीयराशिस्वामिनौ परेषां अन्य-

ग्रहाणां साहचर्यतः सहावस्थानात् । अयमर्थः—शुभग्रह-साहचर्ये सति द्वितीयद्वादशेशयोः शुभफलप्रदत्वम्, अशुभग्रह-साहचर्ये तु अशुभफलप्रदत्वम् । इदमपि यस्मिन् भावे तावुभौ तिष्ठतस्तद्भावद्वारैव दद्त इत्याह स्थानान्तरानुगुण्येनेति । अन्यस्थानं स्थानान्तरं तस्य आनुगुण्यं शुभत्वादि तेन अयं भावः । मित्रादिस्थानस्थत्वे मित्रादिद्वारा शुभफल-प्रदत्वम् । शत्रुभावस्थत्वे शत्रुद्वारैवाशुभप्रदत्वम् । एवं ग्रहान्तरस्य दीप्तत्वादिगुणयोगाच्छुभाशुभफलप्रदत्वमिति । दीप्तत्वादिप्रयुक्तं फलमुक्तं ग्रन्थान्तरे—

'पाके प्रदीप्तस्य धराधिपत्यमुत्साहशौर्ये धनवाहने च ।
स्त्रीपुत्रलाभं शुभबन्धुपूज्यं क्षितीश्वरान्मानमुपैति विद्याम् ॥
स्वस्थस्यखेटस्यदशाविपाकेस्वस्थोनृपाल्लब्धधनादिसौख्यम्
विद्यां यशः प्रीतिमहत्त्वमाराद्दारार्थभूम्यादिजधर्ममेति ॥
मुदान्वितस्यापि दशाविपाके वस्त्रादिभूगन्धसुतार्थधैर्यम् ।
पुराणधर्मश्रवणादिलाभं वस्त्रादियानाम्बरभूषणाप्तिम् ॥
दशाविपाके सुखधैर्यमेति शान्तस्य भूपुत्रकलत्रयानम् ।
विद्याविनोदान्वितधर्मशास्त्रं बह्वर्थदेशाधिपपूज्यतां च ॥
स्थानच्युतिर्बन्धुविरोधता च दीनस्य खेटस्य दशाविपाके ।
जीवत्यसौ कुत्सितहीनवृत्त्या त्यक्तो जनै रोगनिपीडितःस्यात्
दुःखार्दितस्यापि दशाविपाके नानाविधं दुःखमुपैतिनित्यम् ।
विदेशगो बन्धुजनैर्विहीनश्चौराग्निभूपैर्भयमातनोति ॥
वैकल्यखेटस्य दशाविपाके वैकल्यमायाति मनोविकारम् ।

मित्रादिकानां मरणं विशेषात् स्त्रीपुत्रयानाम्बरचोरपीडाम्॥
दशाविपाके कलहं वियोगं खलस्य खेटस्य पितुर्वियोगम्।
शत्रोर्जनानां धनभूमिनाशमुपैति नित्यं स्वजनैश्च निन्दाम्॥
कोपान्वितस्यापि दशाविपाकेपापाःसमायान्ति बहुप्रकारैः।
विद्याधनस्त्रीसुतबन्धुनाशं पुत्रादिकृच्छ्रंत्वथनेत्ररोगमिति॥'

एवं स्थानान्तरानुगुण्येन व्ययाद्वितीयेशयोः फलं वक्तव्यम् ८॥
अथ स्वजन्मलग्नादष्टमेशस्य शुभाशुभत्वमाह—

भाग्यव्ययाधिपत्येन रन्ध्रेशो न शुभप्रदः।
स एव शुभसंधाता लग्नाधीशोऽपि चेत्स्वयम्॥९॥

भाग्येति। भाग्याद्व्ययः नवमाद्द्वादशः अर्थादष्टमस्तस्याधिपत्यं स्वामित्वं तेन निमित्तेन रन्ध्रेशोऽष्टमेशः न शुभप्रदो भवति। भाग्यव्यययोराधिपत्येनेति तु न व्याख्येयम्, अष्टमेशस्य व्ययेशत्वमसंभवात्। केचित्तु अष्टमादष्टमस्यापि रन्ध्रत्वातिदेशात्तृतीयेशोऽपि रन्ध्रेशः स च पुनर्व्ययेशः संभवति कर्कस्य लग्नत्वे बुधः, मकरस्य लग्नत्वे गुरुः सोऽयं भाग्यव्ययाधिपत्येनाशुभ इत्यर्थः। यद्यष्टमेशस्य निमित्तवशादशुभत्वमुच्यते तथा तृतीयेशस्याप्यशुभत्वे निमित्तं वाच्यम्। तदेवानेनोच्यते—यदि तत्र नोच्यते तर्हीहापि न वाच्यम्। रन्ध्रेशो न शुभप्रद इति। एतावतैतात्सिद्धेरिति प्राहुः स एवेति रन्ध्रेश एव स्वयं लग्नाधीशोऽपि चेत्तदा शुभसंघाता शुभस्यैव कारको भवति, अष्टमेशत्वदोषस्तस्य नास्तीति भावः॥ ९॥

अथ केन्द्रेशत्वं सौम्यग्रहाणामशुभमित्युक्तं तत्र गुरुशुक्रयोर्विशेषमाह—

केन्द्राधिपत्यदोषस्तु बलवान् गुरुशुक्रयोः।
मारकत्वेपि च तयोर्मारकस्थानसंस्थितिः॥१०॥

केन्द्राधिपत्येति। लग्नचतुर्थसप्तमदशमेशत्वप्रयुक्तो दोषो गुरुशुक्रयोरेव बलवान्। गुरुशुक्रौ केन्द्राधिपती चेत्तदा न दिशन्ति शुभं नृणामित्यादिनोक्तो दोषो बलवान् अतिशयेन बलिष्ठो भवति। अत्रापि विशेषमाह मारकत्वेपीति। तयोः केन्द्राधिपतित्वविशिष्टयोर्गुरुशुक्रयोर्मारकस्थानसंस्थितिर्लग्नात्सप्तमद्वितीयस्थानसंस्थितिर्मारकत्वे बलवती, अन्यापेक्षया तयोरेव मारकत्वमिति भावः। सप्तमद्वितीययोर्मारकस्थानत्वं वक्ष्यति॥१०॥

अथ बुधचन्द्रयोः केन्द्राधिपत्यदोषो नास्तीति पूर्वश्लोकस्य तुशब्देन ज्ञापितं तं तत्र विशेषमाह—

बुधस्तदनु चंद्रोपि भवेत्तदनु तद्विधः।
न रन्ध्रेशत्वदोषस्तु सूर्याचन्द्रमसोर्भवेत्॥११॥

तदनु। तस्माच्छुक्रादनन्तरं बुधस्तद्विधः केन्द्राधिपत्यदोषवान् गुरुशुक्रापेक्षया किञ्चिन्न्यूनदोषवान् तदनु बुधादप्यनन्तरं चन्द्रोऽपि तद्विधः केन्द्राधिपत्यदोषवान् बुधापेक्षयान्यूनदोषवान्। मारकस्थानसंस्थितिरपि गुरुशुक्रापेक्षया बुधस्य दुर्बला बुधापेक्षया चन्द्रस्य दुर्बला, इति च बोध्यम्। अथ भाग्यव्ययाधिपत्यप्रयुक्तो रन्ध्रेशस्य दोष उक्तस्तत्रापवादमाह—

न रन्ध्रेशत्वेति । सूर्याचन्द्रमसो रन्ध्रेशत्वदोषस्तु न भवेत् । सूर्याचन्द्रमसौ जन्मलग्नादष्टमाधीशौ भवतस्तदा तयोरष्टमेशत्वदोषो न भवतीत्यर्थः ॥ ११ ॥

अथ क्रूराणां केन्द्राधिपतित्वेन शुभकारित्वं पूर्वमुक्तं तत्र भौमविषये विशेषमाह——

कुजस्य कर्मनेतृत्वप्रयुक्ता शुभकारिता ।
त्रिकोणस्यापि नेतृत्वे न कर्मेशत्वमात्रतः ॥ १२ ॥

कुजस्येति । कुजस्य भौमस्य कर्मनेतृत्वप्रयुक्ता शुभकारिता तदा स्याद्यदि भौमस्त्रिकोणस्यापि नेता स्यादित्यर्थः । त्रिकोणनेतृत्वाभावे तु कर्मनेतृत्वमात्रेण न शुभकारित्वम् । कर्कलग्ने यस्य जन्म तस्यायं योगः । वृश्चिकस्य पञ्चमत्वेन मेषस्य दशमत्वेन भौमस्य तदीशत्वादिति । एवं सर्वे त्रिकोणनेतार इत्यारभ्य सप्तानां ग्रहाणां शुभाशुभत्वमुक्तम् तत्र मेषादिभावेषु जन्मवतां यस्य ग्रहस्य पापत्वं यस्य वा शुभत्वं यस्य च योगकारकत्वं तत्सर्वं संगृहीतं पाराशरीये——

मंदसौम्यसिताः पापाः शुभौ गुरुदिवाकरौ ।
न शुभं योगमात्रेण प्रभवेच्छनिजीवयोः ॥
परतंत्रेण जीवस्य पापकर्मापि निश्चितम् ।
कविः साक्षान्निहन्ता स्यान्मारकत्वेन लक्षितः ॥
संघातयोर्निहन्तारो भवेयुः पापिनो ग्रहाः ।
शुभाशुभफलान्येवं ज्ञातव्यानि क्रियोद्भवे ॥

इति मेषजन्मनः फलम् । अथाग्रे वृषस्य—

जीवशुक्रेन्दवः पापाः शुभौ शनिशशीसुतौ ।
राज्ययोगकरः साक्षादेक एव रवेः सुतः ॥
जीवादयो ग्रहाः पापाः संति मारकलक्षणाः ।
बुधस्तत्र फलान्येवं ज्ञेयानि वृषजन्मनः ॥

इति वृषलग्नजातफलम् । अथाग्रे मिथुनस्य—

भौमजीवारुणाः पापा एक एव कविः शुभः ।
शनैश्चरेण जीवस्य योगो मेषभवो यथा ॥
नायं शशी निहन्ता स्यादुन्मिषत्पापनिष्फलम् ।
ज्ञातव्यानि दिनेशस्य फलान्येतानि सूरिभिः ॥

इति मिथुनभावफलम् । अथाग्रे कर्कस्य—

भार्गवेन्दुसुतौ पापौ भूसुतांगिरसौ शुभौ ।
एक एव ग्रहः साक्षाद्भूसुतो योगकारकः ॥
निहन्ता रविजोऽन्ये तु मानिनो मारकाह्वयाः ।
कुलीरसंभवस्यैव फलान्युक्तानि सूरिभिः ॥

इति कर्कजन्मनः फलम् । अथाग्रे सिंहस्य—

रौहिणेयसितौ पापौ कुज एव शुभग्रहः ।
प्रभवेद्योगमात्रेण न शुभं कुजशुक्रयोः ॥
घ्नन्ति सौम्यादयः पापा मारकत्वेन लक्षिताः ।
एवं फलानि वेद्यानि सिंहे यस्य जनुर्भवेत् ॥

इति सिंहजन्मनः फलम् । अथाग्रे कन्यायाः—

कुजजीवेन्दवः पापा एक एव भृगुः शुभः ।
भार्गवेन्दुसुतावेव भवेतां योगकारकौ ॥
निहन्ता कविरन्ये तु मारकास्तु कुजादयः ।
प्रतीक्षेत फलान्युक्तान्येवं कन्याभवे बुधैः ॥

इति कन्याजन्मफलम् । अथाग्रे तुलायाः—

जीवार्कमहिजाः पापाः शनैश्चरबुधौ शुभौ ।
भवेतां राजयोगस्य कारकौ चन्द्रतत्सुतौ ॥
कुजो निहन्ति वाद्यानि परे मारकलक्षणाः ।
निहन्तारः फलान्येवं काव्येन तु तुलाभुवः ॥

इति तुलाजन्मफलम् । अथाग्रे वृश्चिकस्य—

सौम्यभौमसिताः पापाः शुभौ गुरुनिशाकरौ ।
सूर्याचन्द्रमसावेव भवेतां योगकारकौ ॥
जीवो निहन्ता सौम्याद्या हन्तारो मारकाह्वयाः ।
तत्तत्फलानि विज्ञेयान्येवं वृश्चिकजन्मनः ॥

इति वृश्चिकजन्मफलम् । अथाग्रे धनुषः—

एक एव कविः पापः शुभौ सौम्यदिवाकरौ ।
योगो भास्करसोमाभ्यां निहन्ता भास्वतः सुतः ॥
घ्नन्ति शुक्रादयः पापा मारकत्वेन लक्षिताः ।
ज्ञातव्यानि फलान्येवं चापजस्य मनीषिभिः ॥

इति धनुर्लग्नजातफलम् । अथाग्रे मकरस्य—

कुजजीवेन्दवः पापाः शुभौ भार्गवचन्द्रजौ ।
स्वयं चैव निहन्ता स्यान्मन्दो भौमादयः परे ॥
तत्तल्लक्षणान्निहन्तारः कविरेकः सुयोगकृत् ।
ज्ञातव्यानि फलान्येवं विबुधैर्मृगजन्मनः ॥

इति मकरजन्मफलम् । अथाग्रे कुम्भस्य—

जीवचन्द्रकुजाः पापा एको दैत्यगुरुः शुभः ।
राजयोगकरो भौमः कविश्चैव बृहस्पतिः ॥
निहन्ता घ्नन्ति भौमाद्या कारकत्वेन लक्षिताः ।
एवमेव फलान्यूह्यान्येतानि घटजन्मनः ॥

इति कुम्भजन्मफलम् । अथाग्रे मीनस्य—

मंदशुक्रांशवः सौम्याः पापा भौमविधू शुभौ ।
महीसुतगुरोर्योगे कारणेनैव भूसुतः ॥
मारकाः कारका वीक्ष्य मंदज्ञौ घ्नन्ति पापिनः ।
इत्यूह्यानि फलान्येवं बुधैस्तु मीनजन्मन इति ॥१२॥

अथ राहुकेत्वो राश्यधीशत्वाभावात्कुत्रास्थितयोः किं फलं कथं वा शुभाशुभं ज्ञातव्यमित्याकांक्षायामाह—

यद्यद्भावगतौ वापि यद्यद्भावेशसंयुतौ ।
तत्तत्फलानि प्रबलौ प्रदिशेतां तमोग्रहौ ॥१३॥

यद्यदिति । तमोग्रहौ राहुकेतू यद्यद्भावगतौ अपि यद्यद्भा-

वेशसंयुतौ वा स्यातां तत्तत्फलानि प्रबलावतिशयेन प्रदिशेतां ददत: । अयमर्थ: यस्य यस्य ग्रहस्य यो यो भाव: स्थानं स ग्रहो यत्फलं ददाति तत्फलमेव प्रदिशेतां प्रकर्षेणैव ददत: । यत: प्रबलौ प्रकर्षेण बलवन्तौ स्वाभाविकबलवत्त्वं तयो: प्रकर्षस्तद्भावेशग्रहापेक्षया तयोर्बलवत्त्वात् । अथवा यद्भावेश-संयुतौ स्यातां स च भावेश: स्वस्य यथाफलं दिशति तथैव तस्य भावस्य फलं प्रकर्षेण दिशेताम् संयुताविति संबन्धश्चतुर्विध इति वक्ष्यते ॥ १३ ॥

इति श्रीभैरवदत्तविरचिते उडुदायप्रदीपोद्योते संज्ञाध्याय: ॥१॥

अथ योगाध्याय: ।

तत्र सामान्ययोगानाह—

केन्द्रत्रिकोणपतय: सम्बन्धेन परस्परम् ।
इतरैरप्रसक्ताश्चेद्विशेषफलदायका: ॥१४॥

केन्द्रत्रिकोणपतय इति । केन्द्रपतयस्त्रिकोणपतयश्च परस्परं अन्योन्यं संबन्धेनेति संबन्धश्चतुर्विध: । अन्योन्य-राशिस्थितत्वं प्रथम:, यथा मेषे वृश्चिके वा सूर्य: भौमस्तु सिंहेऽस्ति तदा सूर्यभौमयो: संबन्ध: । परस्परदृष्टिसंबन्धो द्वितीय:, यथा मेषे भौमस्तुलायां सूर्यस्तौ परस्परं पश्यत: । अन्यतरदृष्टिसंबन्धस्तृतीय:, यथा सिंहे भौम: मीने स्थितं सूर्यं पश्यति भौमं तु सूर्यो न पश्यति । चतुर्थस्तु सहाव-स्थान लक्षण:, यथा भौमसूर्यौ वृषराशिस्थितौ इति । अत्र पूर्व: पूर्व: संबन्धो बलवान् बोध्य: । तथा केन्द्रत्रिकोणपत्यो: परस्परमुक्तसंबन्धसद्भावे विशेषफलदायको योगो भवति

परे तु त्रिषडायपतीनां संबन्धो नापेक्षितस्तदैवाह-इतरैरिति। इतरे त्रिषडायाष्टमपतयस्तैरप्रसक्ता असंबन्धाश्चेत् तेषां संबन्ध-सत्वे तूक्तो योगो न भवतीति भावः ॥ १४ ॥

अथ केन्द्रेशत्रिकोणेशयोर्दोषयुक्तत्वेन योगहानिरित्याह—

केन्द्रत्रिकोणनेतारौ दोषयुक्तावपि स्वयम्।
सम्बन्धमात्राद्बलिनौ भवेतां योगकारकौ ॥१५॥

केन्द्रेति। केन्द्रत्रिकोणाधिपती स्वयं दोषयुक्तावपि संबन्ध-मात्राद्बलिनौ प्रोक्तलक्षणसंबन्धादेव बलिनौ संतौ योगकारकौ विशेषफलदायकयोगकारकौ भवत एवेति भावः।

एतत्संगृहीतं पाराशरीये—

पञ्चमं नवमं चैव विशेषं धनमुच्यते।
चतुर्थं दशमं चैव विशेषं सुखमुच्यते ॥
चन्द्रभानू विना सर्वे मारका मारकाधिपाः।
षष्ठाष्टमव्ययेशास्तु राहुः केतुस्तथैव च ॥
खपाद्रेष्काणपाश्चैव तथा वैनाशकाधिपाः।
विपत्तारामत्यरीशौ वधभेशस्तथैव च ॥
आयान्त्यपौ खपश्चैव चन्द्राक्रान्तगृहाधिपः।
जातके मारकाः प्रोक्ताः कालविद्भिर्मनीषिभिः ॥
दशान्तिमेषु कालेषु मारको मारकप्रदः।
अन्यस्मिन् योगकेऽपीति कालविद्भिर्निरूपितम् ॥

अत्र त्रिकोणयोर्धनत्वाच्चतुर्थदशमयोः सुखत्वाद्धनसुखे-

शयोः संबन्धे योगो भवतीति श्लोकद्वयार्थः । इतरप्रसंगस्तु योगनाशकस्तत्र के तावदितरे इत्याकांक्षायामष्टमे ह्यायुषः स्थानमित्यादिश्लोकपञ्चकमिति बोध्यम् । इति सामान्ययोगनिरूपणम् ॥ १५ ॥

अथ प्रबलराजयोगानाह——

निवसेतां व्यत्ययेन तावुभौ धर्मकर्मणोः ।
एकत्रान्यतरो वापि वसेच्चेद् योगकारकौ ॥१६॥

निवसेतामिति । तावुभाविति केन्द्रत्रिकोणनेतारौ धर्मकर्मणोरिति कथनाद्धर्मकर्मनेतारौ गृह्येते तौ द्वावपि व्यत्ययेन निवसेतां धर्मेशः कर्मणि कर्मेशो धर्मे इत्ययमेको योगः । योगान्तरमाह एकत्रेति । धर्मस्थाने उभौ निवसेतामित्येको योगः कर्मस्थाने उभौ निवसेतामित्यपरो योगः । उभयोर्मध्ये एक एव वा निजस्थाने निवसेत्तदापि राजयोगकारकौ भवतः ॥ १६ ॥

राजयोगान्तरमाह——

त्रिकोणाधिपयोर्मध्ये सम्बन्धो येन केनचित् ।
केन्द्रनाथस्य बलिनो भवेद्यदि सुयोगकृत् ॥१७॥

त्रिकोणाधिपयोरिति । पञ्चमनवमेशयोर्मध्ये येन केनचित् पञ्चमेशेन नवमेशेन सार्धं बलिनः केन्द्रनाथस्य दशमाधिपस्य अन्यकेन्द्रव्यावृत्त्यर्थं बलिन इत्युक्तम् । तस्य सम्बन्धः पूर्वोक्तलक्षणो यदि भवेत्तदा सुयोगकृत् राजयोगकारको भवतीत्यर्थः ॥ १७ ॥

अथ प्रकारान्तरेण योगान्तरमाह—

दशास्वपि भवेद्योगः प्रायशो योगकारिणोः ।
दशाद्वयीमध्यगतस्तदयुक् शुभकारिणाम् ॥ १८ ॥

दशास्वपीति । योगकारिणो राजयोगकारिणोः केन्द्रत्रिकोणयोर्दशाद्वयी धर्मेशदशा कर्मेशदशा चेति दशाद्वयसमाहारो दशाद्वयी तस्या मध्यगतः तदयुक् शुभकारिणां तच्छब्देन योगकारकपरामर्शः । योगकारकसंबन्धरहितानामपि ग्रहाणां दशास्वापि प्रायशो बाहुल्येन राजयोगो भवेत् । धर्मेशकर्मेशयोर्दशायामन्तरभोक्तारो ये ग्रहास्तत्संबन्धरहितास्तेषां दशास्वपि कदाचिद्योगो भवति स एव राजयोगकारक इति भावः ॥ १८ ॥

शुभग्रहाणामुक्ता पापिनामपि योगकारकत्वमाह—

योगकारकसंबन्धात्पापिनोऽपि ग्रहाः स्वतः ।
तत्तद्भुक्त्यनुसारेण दिशेयुर्योगजं फलम् ॥ १९ ॥

योगकारकसंबन्धादिति । स्वतः स्वभावात्पापिनो ग्रहाः योगकारकस्य संबन्धादुक्तसंबन्धान्यतमसंबन्धात् तत्तद्भुक्त्यनुसारेण योगकारकसंबन्धविशिष्टग्रहस्य या भुक्तिस्तामनुसृत्य तत्तद्ग्रहभोगकालावच्छेदेन राजयोगकारकं फलं दद्युरिति भावः ॥ १९ ॥

राजयोगान्तरमाह—

केन्द्रत्रिकोणाधिपयोरेकत्वे योगकारकौ ।
अन्यत्रिकोणपतिना संबन्धो यदि किं परम् ॥ २० ॥

केन्द्रत्रिकोणाधिपयोरिति। एकत्वे इति एक एव केन्द्राधिपः एक एव त्रिकोणाधिपश्च यदि संबन्धविशिष्टस्तदा तावुभौ राजयोगकारकौ भवतः। यदि पुनरन्येन द्वितीयेनापि त्रिकोणपतिना संबन्धस्तदा किं परं ततः श्रेष्ठं किं, न किञ्चिदित्यर्थः। अयं तु सर्वोत्तमराजयोग इत्यभिप्रायः॥२०॥

एतावता प्रबन्धेन भावेशत्वयुक्तानां राजयोगकारकत्वमुक्तमधुना भावेशत्वहीनयोरपि राहुकेत्वो राजयोगप्रकारकत्वमाह—

यदि केन्द्रे त्रिकोणे वा निवसेतां तमोग्रहौ।
नाथेनान्यतरेणापि संबन्धाद्योगकारकौ॥२१॥

यदि केन्द्रेति। तमोग्रहौ राहुकेतू यदि केन्द्रेऽथवा त्रिकोणे निवसेतां तत्र चान्यतरस्य केन्द्रस्य त्रिकोणस्य वा नाथेन स्वामिना संबन्धादुक्तलक्षणयोगकारकौ भवतः। यदा तौ केन्द्रस्थौ तदा त्रिकोणनाथेन संबन्धः, यदा त्रिकोणे स्यातां तदा केन्द्रनाथेन संबन्धश्चेत्तदा योगकारकौ भवेतामित्याहुः।

एते च योगा व्याख्याताः पाराशर्ये—

अथातः संप्रवक्ष्यामि राजयोगादिपञ्चकम्।
गुह्यकस्थानभेदेन राशिदृष्टे दशाफलम्॥
तपःस्थानाधिपो मन्त्री मंत्राधीशो विशेषतः।
उभावन्योन्य संदृष्टौ जातश्चेदिह राज्यभाक्॥
यत्र कुत्रापि संयुक्तौ तं वापि समसप्तमौ।

राजवंशोद्भवो बालो राजा भवति निश्चयः ॥
वाहनेशस्तथा माने मानेशो वाहने स्थितः ।
राजधर्माधिपाभ्यां तु दृष्टौ चेदिह राज्यभाक् ॥

सुतेशकर्मेशसुखेशलग्ननाथा यदा धर्मपसंयुताश्चेत् ।
नृपोन्तरश्चेदिह वारणाढ्यःस्वतेजसा व्याप्तदिगन्तरालः ॥

सुखकर्माधिपौ चैव मन्त्रिनाथेन संयुतौ ।
धर्मेशेनाथवा युक्तौ जातश्चेदिह राज्यभाक् ॥

सुतेश्वरो धर्मपसंयुतश्चेल्लग्नेश्वरेणापि युतो विलग्ने ।
सुखेऽथवामानगृहेऽथवा स्याद्राज्याभिषिक्तो यदि राजवंश्यः॥

धर्मस्थाने गुरुक्षेत्रे स्वगृहे भृगुसंयुते ।
पञ्चमाधिपसंयुक्ते जातश्चेदिह राज्यभाक् ॥ इति ।

अथ प्रसंगाद्धनयोगफलम्—

अतः परं प्रवक्ष्यामि धनयोगं विशेषतः ।
पञ्चमे तु भृगुक्षेत्रे तस्मिञ्छुक्रेण संयुते ॥
लाभे शनैश्चरयुते बहुद्रव्यस्य नायकः ।
पञ्चमे सौम्यजक्षेत्रे तस्मिन् सौम्ययुते यदि ॥
लाभे च चंद्रभौमौ तु बहुद्रव्यस्य नायकः ।
पञ्चमे तु शनिक्षेत्रे तस्मिन् सूर्ययुते यदि ॥
लाभे सोमात्मजस्थे वा बहुद्रव्यस्य नायकः ।
पञ्चमे तु रविक्षेत्रे तस्मिन् रवियुते यदि ॥
लाभे रवीन्द्रपूज्यस्थे बहुद्रव्यस्य नायकः ।

पञ्चमे तु शनिक्षेत्रे तस्मिन् शनियुते यदि ॥
लाभे भौमेन संयुक्ते बहुद्रव्यस्य नायकः ।
पञ्चमे तु गुरुक्षेत्रे तस्मिन् गुरुयुते यदि ॥
लाभे तु चन्द्रभौमौ चेद्बहुद्रव्यस्य नायकः ।
भानुक्षेत्रे गते तस्मिन् लग्ने भानुः स्थितो यदि ॥
भौमेन गुरुणा युक्तो दृष्टो वा स्याद्युतो धनी ।
चन्द्रक्षेत्रगते लग्ने तस्मिन् चंद्रयुते यदि ॥
जीवभौमयुते यस्तु दृष्टे जातो धनी भवेत् ।
भौमक्षेत्रगते लग्ने तस्मिन् भौमयुते यदि ॥
सोमशुक्रार्कजैर्युक्ते दृष्टे श्रीमान्नरो भवेत् ।
गुरुक्षेत्रगते लग्ने तस्मिन् गुरुयुते यदि ॥
सौम्यभौमयुते दृष्टे जातो यस्तु धनी नरः ।
बुधक्षेत्रगते लग्ने तस्मिन् सौम्ययुते यदि ॥
शनिशुक्रयुते दृष्टे जातो यस्तु धनी नरः ।
भृगुक्षेत्रगते लग्ने तस्मिन् भृगुयुते यदि ॥
शनिसौम्ययुते दृष्टे जातो यस्तु धनी नरः ।

इति धनयोगफलम् ॥

अथ दारिद्र्ययोगाः प्रदर्श्यन्ते—

अथातः संप्रवक्ष्यामि दारिद्र्यं दुःखकारणम् ॥
लग्नाधिपे रिष्फगते रिष्फेशे लग्नमागते ।
मारकेशयुते दृष्टे जातः स्यान्निर्धनो नरः ॥

लग्नाधिपे शत्रुगृहं गते वा षष्ठेश्वरे लग्नगतेऽपि वा चेत् ।
विलग्नपे मारकनाथदृष्टे जातो भवेन्निर्धनकोऽपि वैश्यः ॥
लग्नेन्दुकेतुयुक्ते वा लग्नेशे निधनं गते ।
मारकेशयुते दृष्टे जातो वै निर्धनो भवेत् ॥
षष्ठाष्टमव्ययगते लग्नेशे पापसंयुते ।
मारकेशयुते दृष्टे राजवंश्योऽपि निर्धनः ॥
विलग्ननाथो रिपुनाशरिष्फनाथेन युक्ते यदि पापदृष्टे ।
मन्त्रात्मजे नाथयुतेऽपि दृष्टे शुभैर्न दृष्टे स भवेद्दरिद्रः ॥
मन्त्रेशो धर्मनाथश्च षष्ठे कर्मस्थितौ क्रमात् ।
दृष्टौ चेन्मारकेशेन जातः स्यान्निर्धनो नरः ॥
पापग्रहे लग्नगते राज्यधर्माधिपौ विना ।
मारकेशयुते दृष्टे जातः स्यान्निर्धनो नरः ॥
यद्भावेशो रन्ध्ररिष्फारिसंस्थो यद्भावस्थारन्ध्ररिष्फारिभेशाः ।
पापैर्दृष्टो मंददृष्टोथवा चेद् दुःखाक्रान्तश्चञ्चलो निर्धनःस्यात् ॥
चन्द्राक्रान्तनवांशेशो मारकेशयुतो यदि ।
मारकस्थानगो वापि जातोऽसौ निर्धनो नरः ॥
विलग्नेशनवांशेशो रिष्फषष्ठाष्टगो यदि ।
मारकेशयुतो दृष्टो जातोऽसौ निर्धनो नरः । इति ॥२१॥

प्रकृतमनुसरामः । अथ राजयोगभंगमाह—

धर्मकर्माधिनेतारौ रंध्रलाभाधिपौ यदि ।
तयोः संबन्धमात्रेण न योगं लभते नरः ॥२२॥

धर्मकर्माधीति । नवमदशमभावेशौ क्रमेणाष्टमैकादशभावेशौ यदि तदा राजभंगयोगः । अयमर्थः—नवमभावेशो यः स एवाष्टमभावेशश्चेत्तदा राजयोगो न स्यात् । दशमभावस्वामी यो ग्रहः स एव लाभस्वामी यदि तदापि राजयोगो न स्यात् । एवं नवमेशोऽष्टमेशेन संबन्धं करोति तदा राजयोगं न लभते । दशमेशो लाभेशेन संबन्धं करोति चेत्तदापि राजयोगं न लभत इत्यर्थः ॥ २२ ॥

इति भैरवदत्तविरचिते उडुदायप्रदीपोद्योते राजयोगाध्यायः ।

अथायुर्दायाध्यायो व्याख्यायते—

अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत् ।
तयोरपि व्ययस्थानं मारकस्थानमुच्यते ॥२३॥

अष्टममिति । जन्मलग्नादष्टमस्थानमायुःस्थानमुच्यते । अष्टमस्थानादपि यदष्टमम्, अर्थाज्जन्मलग्नात्तृतीयं तदप्यायुःस्थानमित्युच्यते । मारकस्थानमाह—तयोरपीति । तयोः आयुःस्थानयोरष्टमतृतीययोरपि व्ययस्थानम्, अष्टमस्य व्ययस्थानं सप्तमं तृतीयस्य व्ययस्थानं द्वितीयं तेन सप्तमं द्वितीयं च स्थानं मारकस्थानमिति ॥ २३ ॥

अथ सप्तमापेक्षया द्वितीयस्य बलवत्त्वमित्याह—

तत्राप्याद्यव्ययस्थानाद्द्वितीयं बलवत्तरम् ।
तदीशितुस्तत्र गताः पापिनस्तेन संयुताः ॥२४॥

तत्रापीति । तत्र सप्तमद्वितीययोर्मध्ये आद्यव्ययस्थानात

अष्टमापेक्षया व्ययस्थानभूतात् सप्तमात् उत्तरं तृतीयापेक्षया व्ययस्थानभूतं द्वितीयं बलवत्तरं अतिशयेन बलवत्। सप्तमं मारकस्थानं बलवत् द्वितीयं तदपेक्षयापि बलवत्तरमित्यर्थः। तेन जन्मलग्नाद्द्वितीयराशीशस्य दशायां मरणं वाच्यमित्युक्तं भवति। तदेवाह—तदीशितुरिति। तच्छब्देनाव्यवहितपूर्वापरस्थितस्य द्वितीयस्य परामर्शः। तेन द्वितीयस्थानेशस्य दशाविपाकेषु संभवे सति नृणां निधनं स्यादित्युत्तरश्लोकार्धेन संबंधः। अथवा तत्र गता द्वितीयस्थानगता ये पापिनस्त्रिषडायेशास्तेन मारकेशेन युक्तास्तेषां दशाविपाकेषु संभवे सति निधनं मरणं वाच्यमित्यर्थः॥ २४॥

मरणकालज्ञानार्थमाह—

तेषां दशाविपाकेषु सम्भवे निधनं नृणाम्।
तेषामसम्भवे साक्षाद्व्ययाधीशदशास्वपि॥२५॥

तेषामिति। मारकेशसंबंधविशिष्टाः मारकेशस्थानस्थिता ये पापग्रहास्तेषामित्यर्थः। दशाविपाकेषु दशाः पूर्वमुक्तास्तेषां विपाका अन्तर्दशादिप्राणदशान्ताः परिणामास्तेषु मरणं स्यादित्यर्थः। संभवे इति कथनात्संभवाभावे तद्दशाविपाकेऽपि मरणं स्यादिति सूच्यते। संभवलक्षणं तूक्तं ग्रन्थान्तरे—

त्रिविधश्चायुषां योगः स्वल्पायुर्मध्यमुत्तरम्।
द्वात्रिंशत्पूर्वमल्पं तु तदूर्ध्वं मध्यमं भवेत्॥
आसप्ततेस्तदूर्ध्वं तु दीर्घायुरिति संमतम्।
उत्तमायुः शतादूर्ध्वं मुनीशाः संति तद्विदः॥

अल्पायुर्लग्नपे भानौ शत्रौ मध्यं तु मध्यमे ।
मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतम् ॥
अल्पायुर्योगजातस्य विपत्तारे मृतिं वदेत् ।
जातस्य मध्यमे योगे प्रत्यरौ तु मृतिं वदेत् ॥
दीर्घायुर्योगजातस्य वधभे तु मृतिर्भवेत् ।
त्रिषु योगेषु सर्वेषु प्रत्येकं त्रिविधं भवेत् ॥
अल्पायुरल्पमध्यं तु पूर्णायुस्त्रिविधं मतम् ।
मध्यमादल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ॥
दीर्घायुषोऽल्पमध्यं तु पूर्णायुस्त्रिविधं भवेत् ।
एवं नवविधं प्रोक्तमायुषां तु विनिर्णयम् ॥

इति सर्वार्थचिन्तामणौ । एवं प्रथममायुर्निश्चयः कर्तव्यः । अल्पायुर्वा मध्यायुर्वा दीर्घायुर्वेति । अल्पायुर्निश्चये तन्मध्ये चेन्मारकेशदशा समायाति मारकस्थानस्थितपापग्रहदशा वा मारकेशेन संबंधकर्तृदशा वा तत्र मरणं वाच्यम् । एवं मध्यायुर्निश्चये मध्यमायुर्मध्ये मारकेशदशादीनां त्रयाणां दशाविपाकेषु मरणं वाच्यम् । एवं दीर्घायुर्निश्चये तन्मध्ये मारकेशदशादीनां दशाविपाकेषु मरणं वाच्यमिति । प्रकारान्तरेणाप्यायुर्निश्चयः तथा च जैमिनिसूत्रम्—

प्रथमयोरुत्तरयोर्वा दीर्घमिति ।

अयमर्थः—चरराश्योर्यदि लग्नेशाष्टमेशौ भवतस्तदा दीर्घमायुः । स्थिरद्विस्वभावयोर्वा लग्नेशाष्टमेशौ यदि तदापि दीर्घमायुः । मध्यमायुराह—

प्रथमद्वितीययोरन्त्ययोर्वा मध्यमिति ।

चरस्थिरयोर्यदि लग्नेशाष्टमेशौ तदा मध्यमायुः, द्विस्वभावयोर्वा लग्नाष्टमेशौ यदि तदापि मध्यमायुरित्यर्थः ।

अल्पायुराह—

मध्ययोराद्यन्तयोर्वा हीनमिति ।

स्थिरयोर्यदि लग्नाष्टमेशौ तदप्यल्पमायुरिति ।

एवं मन्दचन्द्राभ्यां लग्नहोराभ्यां वा निश्चयमिति ।

अथोक्तरीत्याल्पायुर्निश्चितं मारकेशदशाविपाकस्तु नास्ति तदानीं कथं वाच्यमित्याशंकायामाह—तेषामसंभव इति । पूर्वोक्तानां संभवाभावे साक्षाद्व्ययाधीशस्य जन्मलग्नाद्द्वादशस्वामिनो दशासु दशान्तर्दशादिषु मरणं वाच्यम् । अपि शब्दाद्व्ययाधीशसंबंधिनां पापिनां दशास्वपि मरणं वाच्यमित्यर्थः ॥ २५ ॥

यदा तु व्ययेशादेरपि दशादिकं तत्र न लभ्यते वयस्त्वल्पमेव निर्णीतं तदा कथं वाच्यमित्यत आह——

अलाभे पुनरेतेषां सम्बन्धेन व्ययेशितुः ।
क्वचिच्छुभानां च दशा ह्यष्टमेशदशासु च ॥२६॥

अलाभ इति । पुनस्त्वर्थे । एतेषां व्ययेशव्ययस्थानगतव्ययेशसंबंधिनां पापिनां च अलाभे व्ययेशितुर्द्वादशेशस्य संबन्धेन सहावस्थानादिलक्षणेन शुभानामेव ग्रहाणां दशाविपाकेषु

निधनं वाच्यमिति संबंधः। व्ययेशसंबंधिनां शुभानामव्यलाभे त्वाह—क्वचिदिति भिन्नक्रमः क्वचिदष्टमेशदशास्विति योजना चाप्यर्थे। लग्नापेक्षया येष्टमेशास्तद्दशास्वपि निधनं वाच्यमित्यर्थः ॥ २६ ॥

केवलानां च पापानां दशासु निधनं क्वचित्।
कल्पनीयं बुधैर्नृणां मारकाणामदर्शने ॥२७॥

केवलानामिति। अथ पूर्वोक्तानां सर्वेषामसंभवे दर्शने भावाद्लाभे सति केवलानां मारकसंबन्धेनापि रहितानां पापानां पापग्रहाणां त्रिषडायेशानां दशासु बुधैर्दैवतत्त्वाविद्भिः क्वचित् कदाचित् निधनं कल्पनीयम्। चन्द्रभानू विना मारकस्थानाधिपो मारकेशः षष्ठाष्टमव्ययेशा राहुकेतू च एषां मध्ये य आयनवांशपतिः स सग्रहो मारकः। तथा चन्द्राक्रान्तनवांशपतिर्मारकः। पापषड्वर्गशत्रुग्रहास्तन्नीचवर्गादिषु षड्वर्गेशशब्देन स्वनवांशस्वद्रेष्काणस्वद्वादशांशस्वत्रिंशांशा गृह्यन्ते। पापग्रहकृते योगे मृत्युः। शुभग्रहकृते पीडामात्रमित्यादिकल्पनीयमिति ॥ २७ ॥

अथ विशेषतः शनेर्मारकयोगमाह—

मारकैः सह संबंधान्निहन्ता पापकृच्छनिः।
अतिक्रम्येतरान् सर्वान् भवत्येव न संशयः ॥२८॥

मारकैरिति। पापकृत् त्रिषडायेशत्वप्रयुक्तपापलक्षणाक्रांतत्वात् पापकर्तांशनिः मारकैः मारकस्थानेशादिभिःसह संबंधात् सहावस्थानपरस्परदृष्ट्यादिलक्षणसंबंधाद्धेतोः इतरान् सर्वान्

मारकानतिक्रम्य मारको भवत्येव । एवकारो भिन्नक्रमः । शनिरित्यस्यान्तरं द्रष्टव्यं तथा चान्यमारकापेक्षया शनिरेव मारक इत्यर्थः । न संदेह इति संदेहोऽत्र न कर्तव्यः । पापकृत्वमात्रेण शनेर्मारकत्वं यदा तु शनिरेव मारकेशः तदा किं वक्तव्यमित्यर्थः । अतः शनेः प्राबल्यमिति सिद्धम् । दशा चात्र विंशोत्तरीग्राह्येत्युक्तं प्राक् तत्फलमिदानीमुच्यते पाराशरीये—

अथ वक्ष्ये खगेशानां भुक्तिं पञ्चविधामहम् ।
दशा चान्तर्दशा चैव प्रत्यन्तरदशा तथा ॥

सूक्ष्मभुक्तिः प्राणदशाप्येवं पञ्च दशाः स्मृताः ।
लग्नेशे स्वनवांशस्थे तस्य भुक्तिः शुभावहा ॥

स्वदशांशगते लग्ननाथे स्वस्य दृकाणगे ।
तस्य भुक्तिं शुभामाहुर्यवनाद्या विशेषतः ॥

स्वत्रिंशांशेऽथवा मित्रात्रिंशांशे स्थितो यदि ।
तस्य भुक्तिः शुभा प्रोक्ता कालविद्भिर्मनीषिभिः ॥

बुद्धिक्षेत्रनवांशस्थे पुनर्द्विरसभांशपे ।
मित्रद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा ॥

तपो राशिनवांशस्थे धर्माद्विरसभांशपे ।
गुरुद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा ॥

सुखराशिनवांशस्थे वाहनाद्विरसांशके ।
सुखद्रेष्काणगे वापि तस्य भुक्तिः शुभावहा ॥

विलग्ननाथस्थितभांशनाथे मित्रांशगे मित्रग्रहेण दृष्टे।
सुहृद्दृकाणस्वनवांशके वा तदंशभुक्तिं शुभदां वदन्ति ॥

इति शुभदशा।

अथ वक्ष्ये विशेषेण दशां कष्टफलप्रदाम्—

षष्ठाष्टमव्ययेशानां दशा कष्टप्रदायिनी।
एतद्भुक्तिषु कष्टं स्यान्मारकस्य दशा यदा ॥
मारकेशस्तु षष्ठेशयुक्तो लग्नाधिपो यदि।
तस्य भुक्तौ ज्वरप्राप्तिमाहुः कालविदो जनाः ॥
सरोगेशशरीरेशश्चतुःषड्वर्गसंस्थितः।
जलदोषादस्य भुक्तौ स्यादजीर्णं न संशयः ॥
षष्ठेशयुतलग्नेशो बुधषड्वर्गसंस्थितः।
कफस्तस्य भवेद्भुक्तौ वातो वा देहजाड्यकृत् ॥
सारिनाथो विलग्नेशो गुरुः षड्वर्गगोपि चेत्।
तस्य भुक्तौ भवेद्रोगः पीडा वा ब्राह्मणे नतः ॥
नक्षत्रेशो विलग्नेशो भृगुः षड्वर्गगो यदि।
तस्य भुक्तौ भवेद्वातः सान्निपातोऽथवा नृणाम् ॥
लग्नेशरोगेश्वरसंयुताश्चेत्स्युश्चेत्समंदात्मजराहुकेतवः।
तदा सुहिक्का सविषूचिकादिरोगे नराणामथ तस्य भुक्तौ ॥
एवं भ्रात्रादिभावानां नायको यत्र संस्थितः।
तस्य षड्वर्गयोगेन तत्तद्भावफलं वदेत् ॥

इति कष्टदशा।

अथ विदशा—

लग्नेशरोगनाथौ च निधनेशेन संयुतौ ।
मारकेशयुतौ दृष्टौ रोगनाथांशगौ यदि ॥
तस्य भुक्तौ विजानीयाद्व्यथां शस्त्रेण वै नृणाम् ।
शुभयोगेन बाधा स्यात्पापयोगेन मृत्युकृत् ॥
जीवांशे जीववर्गेण मूलांशे मूलवर्गतः ।
रोगादिप्रवदेत्तत्र तेषां भुक्तिवशात्फलम् ॥

विलग्ननाथस्य नवांशनाथो रन्ध्रांशपस्याधिपतिश्च युक्तौ ।
मेषस्य षड्वर्गगतौ यदा तौ भुक्तौ तयोर्जम्बुकभीतितो वधः ॥

वृषवर्गगतौ तौ चेद्वृश्चिकाद्भयमादिशेत् ।
युग्मवर्गगतौ भीतिः कपिजा नात्र संशयः ॥
कुलीरवर्गगौ तौ चेद्रासभाद्भीतिमादिशेत् ।
सिंहवर्गगतौ तौ चेद्भुक्तौ व्याघ्रजं भयम् ॥
कन्यावर्गगतौ तौ चेद्भल्लूकाद्भयमञ्जसा ।
वणिग्वर्गगतौ तौ चेत्तद्भुक्तौ स्याद्गजाद्भयम् ॥
अलिवर्गगतौ येषां तेषां स्याद्गजतो भयम् ।
यदि कार्मुकवर्गस्थौ भुक्तौ स्याद्रथजं भयम् ॥
मृगवर्गगतौ तौ चेद्भुक्तौ करभजं भयम् ।
कुंभवर्गगतौ तौ चेद्दोलाङ्गूलाद्भयं भवेत् ॥
मीनवर्गगतौ भुक्तौ तेषां स्याद्ग्रहजं भयम् ।
एवं देहादिभावानां षड्वर्गगतिभिः फलम् ॥

सम्यग्विचार्य मतिमान् प्रवदेत्कालवित्तमः ।

इति विदशा ।

अथ सूक्ष्मदशा—

लग्नेश्वरो रन्ध्रपतिश्च युक्तो वृषे वृषांशे वृषभदृकाणे ।
स्थितौ भवेतां यदि तौ वृषेण घातान्निमित्तौ मरणस्य वेद्यौ॥
वृषे युग्मांशगौ तौ चेद्भल्लूकेन मृतिर्नृणाम् ।
वृषे कर्कांशगौ तौ चेन्नक्रादथ जले मृतिः ॥
वृषे सिंहांशगौ तौ चेत् व्याघ्राद्याघाततो मृतिः ।
वृषे कन्यांशगौ तौ चेत्कपिना नात्र संशयः ॥
वृषे तुलांशगौ तौ चेन्व्याघ्राद्भीतिं वदेत्तदा ।
वृषे कौर्प्यांशगौ तौ चेद्भुक्तौ चिन्ता व्ययो भवेत् ॥
वृषे चापांशगौ तौ चेन्माहिषेण मृतिं वेदत् ।
वृषे मृगांशगौ तौ चेन्महिषेण मृतिं वेदत् ॥
वृषे कुंभांशगौ तौ चेद्गोलाङ्गूलान्मृतिं वदेत् ।
वृषे झषांशगौ तौ चेदजवस्ताद्भयं भवेत् ॥
एवं संचिन्त्य मतिमान् भ्रात्रादीनां मृतिं वदेत् ।

इति सूक्ष्मदशा ।

अथ प्राणदशा—

शरीरनाथो मरणाधिपेन युक्तो मृगेन्द्रेण मृगाधिपांशे ।
तयोर्विपाके भयमाखुतो मृतिं सर्पात्तदा प्राहुरुदारचित्ताः॥
सिंहे कन्यांशगौ तौ चेत्कफकंपादितो मृतिः ।

मृगराजे तुलासंस्थे तयोर्भुक्तौ मृतिं वदेत् ॥
अल्पांशगौ मृगेन्द्रे वा तयोर्दाये सरीसृपात् ।
चापांशगौ मृगेन्द्रे तु तद्वर्गाच्च मृतिं वदेत् ॥
मृगांशगौ तौ सिंहे च तयोर्दाये खरान्मृतिः ।
कुंभांशगौ यदा तौ च मृगराजनृपाद्भयम् ॥
मीनांशकगतौ सिंहे सारङ्गाद्भयमादिशेत् ।
सिंहे मेषांशगौ तौ चेद्गोमायोर्भयमादिशेत् ॥
वृषांशगौ तौ सूर्यर्क्षे तयोर्दाये शुनो मृतिः ।
युग्मांशगौ तौ सूर्यर्क्षे गोलाङ्गूलाद्भयं भवेत् ॥
कर्कांशगौ तौ सिंहे तु दाये ग्राहान्मृतिं वदेत् ।
एवं भ्रात्रादिभावानां तत्तद्भुक्तौ फलं वदेत् ॥

देहाधिपो मृत्युपतिश्च युक्तौ,
चापांशगौ कार्मुकराशिगौ चेत् ।
दाये तयोर्वाजिकृतं च मृत्युं,
वदन्ति तत्कालविदो महान्तः ॥

चापे मृगांशगौ तौ चेत्सारंगाद्भयमादिशेत् ।
हये कुंभांशगौ तौ चेद्वराहाद्भयमादिशेत् ॥
हये मीनांशगौ तौ चेत्पाके नक्राद्भयं तयोः ।
मेषांशगौ तौ चापे तु तयोर्दाये शुनो मृतिः ॥
वृषे हयांशगौ तौ चेद्रासभाद्भयमादिशेदिति ।

अस्मिन् ग्रन्थे पञ्चमनवमयोर्धनसंज्ञा । दशमचतुर्थयोः

सुखसंज्ञा । द्वितीयसप्तमयोर्मारकस्थानसंज्ञा । षडष्टव्यया नेष्टस्थानानि । प्रथमतृतीयैकादशानि समस्थानानि बोद्धव्यानीति ॥ २८ ॥

श्रीभैरवदत्तदैवज्ञकृते उडुदायप्रदीपोद्योते आयुर्दायाध्यायस्तृतीयः ।

अथ नक्षत्रदशाप्रकारेणापि फलदातृत्वं ग्रहाणामेवेति तेषां फलदानकालज्ञानार्थमाह—

न दिशेयुर्ग्रहाः सर्वे स्वदशासु स्वभुक्तिषु ।
शुभाशुभफलं नृणामात्मभावानुरूपतः ॥२६॥

न दिशेयुरिति । ग्रहाः सूर्यादयः सर्वे सकला अपि स्वदशासु षड्शब्दादिरूपासु । स्वभुक्तिषु स्वगतमध्यगतान्तर्दशासु अष्टादशदिनाधिकमासत्रयादिभुक्तिरूपासु च नृणां मनुष्याणां शुभाशुभफलं शुभमशुभं वा यथाप्राप्तं फलं आत्मभावानुरूपतः आत्मनो यो भावः सूर्यस्य सिंह इत्यादिस्तदनुरूपतस्तदनुसारेण मेषादीनां यत्फलं तन्न दिशेयुर्न प्रदद्युरित्यर्थः । स्वभाव एवैष ग्रहाणामिति भावः । नृणामित्युक्तेरर्थात्पश्वादीनां दिशन्तीत्युक्तं भवति ॥ २६ ॥

एवं तर्हि कदा दिशन्तीत्यपेक्षायामाह—

आत्मसम्बन्धिनो ये च ये वा निजसधर्मिणः ।
तेषामन्तर्दशास्वेव दिशन्ति स्वदशाफलम् ॥३०॥

आत्मसंबंधिन इति । ये ग्रहा आत्मसंबन्धिनः आत्मना सहावस्थानादिसंबन्धचतुष्टयेन युक्ताः अथवा ये ग्रहाः

निजसधर्मिणः निजेन स्वेन समानधर्माणः आत्मसंबंध-राहित्येऽपि शुभाशुभाधिपतित्वेन सदृशास्तेषामन्तर्दशास्वेव स्वदशाफलं स्वस्वदशाविचारागतं दिशंति नान्यथेत्यर्थः। स्वयं शुभः शुभभावाधीशो यथा तथैवान्योऽपि। अशुभोऽशुभ-भावाधीशश्चेत्तदा तदन्तर्दशायामशुभमेव फलं प्रदिशेदिति भावः॥ ३०॥

अथ यथात्मसंबंधिनो ग्रहा न लभ्यन्ते नाप्यात्मसधर्मिणो ग्रहास्तदा कथं वाच्यमित्याकांक्षायामाह——

इतरेषां दशानाथविरुद्धफलदायिनाम्।
तत्तत्फलानुगुण्येन फलान्यूह्यानि सूरिभिः॥३१॥

इतरेषामिति। इतरेषां स्वसम्बन्धस्वसमानधर्मरहितानां दशानाथविरुद्धफलदायिनां वर्तमाना या दशा तस्या यो नाथः स्वामी तस्य विरुद्धं यत्फलं.दशानाथविरुद्धं फलं तद्दातुं शीलं येषां ग्रहाणां तेषां भुक्तिषु तत्तत्फलानुगुण्येन तत्तदन्तर्दशा-नाथफलानुगुण्यत्वेन फलानि दशानाथफलानि ऊह्यानि कल्प-नीयानि। अयमर्थः——यदि दशानाथः शुभफलप्रदः इतरे तु न शुभफलप्रदास्तेषामन्तर्दशायामशुभफलमागतं तत्तदनुगुण-मेव फलम्। दशानाथोऽपि ददाति न तु स्वदशाफलं शुभं यदा दशानाथोऽशुभफलद इतरस्तु शुभप्रदस्तदा तदन्तर्दशायां दशानाथोऽपि शुभमेव ददाति न तु स्वदशाफलमशुभमिति भावः॥ ३१॥

अथ केन्द्रेशत्रिकोणेशयोरपीदं प्रसक्तं तत्र विशेषमाह——

स्वदशायां त्रिकोणेशभुक्तौ केन्द्रपतिः शुभम्।

दिशेत्सोऽपि तथा नो चेदसंबन्धेन पापकृत्॥३२॥

स्वदशायामिति केन्द्रपतिः स्वदशायां स्वीयदशायां वर्तमानायां त्रिकोणेशभुक्तौ त्रिकोणपतेरन्तर्दशायां शुभं फलं दिशेत् दद्यात् । संबंधे सतीति योजनीयम्, असंबंधे पापकृत्वस्य वक्ष्यमाणत्वात् । एवं त्रिकोणेशोपि स्वदशायां केन्द्रेशान्तर्दशायां शुभमेव दद्यात् नो चेत्सम्बंधो न चेदित्यर्थः । असंबंधेन सम्बन्धविरहेण हेतुना पापकृदशुभकर्तैव स्यादित्यर्थः । अत्रात्मभावानुरूपः फलान्युक्तानि पाराशरीये——

देहाधिपः पापयुतोऽष्टमस्थो व्ययारिगो वांगसुखं निहंति ।
सर्वत्र भावेषु च योजनीयमेवं बुधैर्भावेवशात्फलं हि ॥
एवं तृतीयेपि च सप्तमेपि फलं विमृश्यं कृतिभिः प्रयत्नात् ।
तथाव्यये मित्रगृहे रिपौमृते स्थितेविलग्नाधिपतौफलं स्यात्॥
पापोविलग्नाधिपतिर्विलग्ने चन्द्रोविलग्ने यदि वालवं स्यात् ।
तदातिरोगं स हि केन्द्रसंस्थस्त्रिकोणलाभेषु गदं निहंति ॥
बलोनतामेव तु पापवत्तामेतस्य वित्तं फलमानुरूप्यम् ।
नीचारिसूर्यस्य गृहेषु तिष्ठन्स्वर्क्षे विनार्थादिगृहत्रये च ॥
देहाधिपश्चन्द्रगृहाधिपो वा तृतीयरिष्फारिगतो बलः स्यात् ।
नीचास्तगद्विष्टगृहे स्थितो वा कार्श्यं शरीरेऽतिगदं करोति ॥

इति प्रथमभावफलम् ।

अथ द्वितीये——

शुक्रेण युक्तो यदि नेत्रनाथः शुक्रस्य वार्त्तादिगृहत्रयस्थः ।
संबंध्यपि स्याद्यदि देहपेन नेत्रं विधत्ते विपरीतभावम् ॥

तत्र स्थितौ चन्द्ररवीनिशान्ध्यं जात्यंधतां नेत्रपदेहपार्काः।
पैत्रर्चनाथेन युतास्तदांध्यं कुर्वन्ति मात्रादिफलं तथेदृक्॥

दोषकृन्न च सर्वत्र स्वोच्चस्वर्चगतो ग्रहः।
षडादित्रयसंस्थश्चेत्ताद्विना दोषकृच्छुभः॥
वागीशवाग्गृहाधीशौ षडादित्रयसंस्थितौ।
मूकतां कुरुतोऽप्येवं पितृमातृगृहाधिपाः॥
वागीशवाग्गृहाधीशौ युतास्ते त्रयसंस्थितौ।
कुर्वन्ति तेषां मूकत्वमेवमूह्यं मनीषिभिः॥
कुटुम्बकारकात्केन्द्रत्रिकोणेषु गता ग्रहाः।
सकुटुम्बकलत्रेशाः कलत्रं वा कुटुम्बकम्॥
पश्यन्ति च द्वयस्था वा यावत्तावत्प्रमाणकम्।
कलत्रं निर्दिशेत्प्राज्ञोऽथवा तेषां च नो वदेत्॥

विद्याधिपौ जीवबुधावविद्यामरित्रयस्थौ कुरुतोपि तौ चेत्।
केन्द्रत्रिकोणस्थग्रहोच्चसंस्थौ प्रयच्छतां द्रागनवद्यविद्याम्॥
एवं बुधस्याङ्गिरसः षडादित्रयास्थितौ नीचगृहोरिनाथः।
केन्द्रत्रिकोणस्य गृहोच्चसंस्थौ धनाभिवृद्धिं कुरुतस्तदैव॥

इति द्वितीयभावफलम्।

अथ तृतीयस्य—

स भौमे भ्रातृभावेशः षडादित्रयसंस्थितः।
भ्रातृक्षेत्रगतो वापि भ्रातृभावं विनिर्दिशेत्॥
तौ पापयोगतः पापक्षेत्रयोगेन वा पुनः।

उत्पाद्य सहजान् सद्यो निहन्ता शास्त्रनिश्चयात् ॥
स्त्रीग्रहो भ्रातृभावेशः स्त्रीग्रहो भ्रातृगोऽपि वा ।
भगिनी स्यात्तदा भ्राता पुंग्रहः पुंग्रहो यदि ॥
मिश्रे मिश्रफलं चात्र बलाबलविनिर्णयः ।

इति तृतीयभावफलम् ।

अथ चतुर्थस्य

गेहाधिनाथेन युते तु गेहे देहाधिपेनापि गृहाभिलब्धिः ।
युते षडादौ तु विपर्ययःस्याद्गृहाधिपे देहपतौ च तद्वत् ॥
केन्द्रत्रिकोणेषु शुभग्रहेण युते समीचीनगृहस्य लब्धिः ।
क्षेत्रस्य चिन्ता सदनाधिपेन जीवेन चिन्ता तु सुखस्यकार्या ॥
दिव्यांगनावाहनवस्तुभूषा चिन्ता तु कार्या भृगुणा बुधेन्द्रैः ।
तमःशनिभ्यामभिचिन्त्यमायुरर्केण तातःशशिनात्र मात्रा ॥
बुधेन बुद्धिः सदनर्क्षसंस्थां गतेन सप्तेशयुतेन च स्यात् ।
केन्द्रत्रिकोणेषु गतेन सप्त प्रपश्यता वापि सतुंगगेन ॥

इति चतुर्थभावफलम् ।

अथ पञ्चमस्य—

षडादित्रयसंस्थे तु सुताधीशे ह्यपुत्रता ।
केन्द्रत्रिकोणसंस्थे तु पुत्रलाभाभिसंभवः ॥
सत्पुत्रलाभः सुतपे सुरेज्ये शुभेषु देहेषु गते च भानौ ।
एकः स्थिरः सुत एक एव स्थितःशुभः केन्द्रनवात्मजस्थे ॥
पितापि चिन्त्यो नवमे सुतर्क्षे एवं विधश्चिन्तनमूह निश्चयम् ॥

क्षेत्रस्य कारको भौमः कर्मस्थानेप्ययं विधिः ।
अस्तंगते पञ्चमेशे पापाक्रान्ते च दुर्बले ॥
षष्ठे नीचे सुताधीशे काकवंध्या विशेषतः ।
षष्ठस्थाने सुताधीशो लग्नेशे कुजवेश्मनि ॥
म्रियते प्रथमापत्यं काकवंध्यात्वमाप्नुयात् ।
सुताधीशो हि नीचस्थः षडादित्रयसंस्थितः ॥
काकवंध्या भवेन्नारी सुते केतुबुधौ यदि ।
सुतेशो नीचगो यत्र सुतस्थानं न पश्यति ॥
तत्र सौरिबुधौ स्यातां काकवन्ध्यात्वमाप्नुयात्।
भाग्येशो मूर्तिवर्ती च सुतेशो नीचगो यदि ॥
सुते केतुबुधौ स्यातां सुतं कष्टाद्विनिर्दिशेत् ।
षडादित्रयसंस्थोपि नीचो वाप्यरिसांस्थितः ॥
पापाक्रान्ते सुतस्थाने पुत्रं कष्टाद्विनिर्दिशेत् ।

इति पञ्चमभावफलम् ।

अथ षष्ठस्य—

षष्ठाधिपोपि पापश्चेद्देहे वाप्यष्टमे स्थितः ॥
तदा व्रणो भवेद्देहे कर्मस्थानेप्ययं विधिः ।
एवं पित्रादिभावेशास्तत्तत्कारकसंयुताः ॥
व्रणाधिपयुताश्चापि षष्ठाष्टमयुता यदि ।
तेषामपि व्रणं वाच्यमादित्येन शिरोव्रणम् ॥
इन्दुना च मुखे कण्ठे भौमेन ज्ञेन नाभिषु ।

गुरुणा नासिकायां च भृगुणा नयने पदे ॥
शनिना राहुणा कुक्षौ केतुना च तथा भवेत् ।
लग्नाधिपः कुजक्षेत्रे बुधस्य यदि संस्थितः ॥
यत्र कुत्र स्थिते ज्ञेन वीक्षितो मुखरुक्प्रदः ।
लग्नाधिपौ कुजबुधौ चंद्रेण यदि संस्थितौ ॥
राहुर्वा शनिना सार्धं कुष्ठं तत्र विनिर्दिशेत् ।
लग्नाधिपं विना लग्ने स्थितश्चेत्तमसा शशी ॥
श्वेतकुष्ठं तदा कृष्णकुष्ठं च शनिना सह ।
कुजेन रक्तकुष्ठं स्यात्तत्तदेवं विचारयेत् ॥
लग्ने षष्ठाष्टमाधीशौ रविणा यदि संस्थितौ ।
ज्वरगण्डः कुजे ग्रन्थिः शस्त्रव्रणमथापि वा ॥
बुधेन पित्तं गुरुणा रोगाभावं विनिर्दिशेत् ।
स्त्रीभिः शुक्रेण शनिना वायुना संस्थितो यदि ॥
गण्डश्चाण्डालचोराभ्यां तमः केत्वोरहेर्भयम् ।
चन्द्रेण गण्डसलिलैः कफश्लेष्मादिना भवेत् ॥
एवं पित्रादिभावानां तत्तत्कारकयोगतः ।
गण्डस्तेषां भवेदेवमूह्यमत्र मनीषिभिः ॥

इति षष्ठभावफलम् ।

अथ सप्तमस्य——

कलत्रपो विना स्वर्क्षं षडादित्रयसंस्थितः ।
रोगिणीं कुरुते नारीं तथा तुङ्गादिकं विना ॥

स्त्रीपुत्रयात्राफलचिन्तनानि कार्याण्यनेनापि सहाधिपेन।
शुभेषु कार्यं शुभदं तथैव पापेन पापं फलमूहनीयम् ॥
सप्तमे तु स्थिते शुक्रेऽतीवकामी भवेन्नरः।
यत्र कुत्र स्थिते पापयुते स्त्रीमरणं भवेत् ॥

इति सप्तमभावफलम्।

अथाष्टमस्य--

आयुःस्थानाधिपः पापैः सहैव यदि संस्थितः।
करोत्यल्पायुषं जातं लग्नेशोऽप्यत्र संस्थितः ॥
एवं हि शनिना चिन्ता कार्या तर्कविचक्षणैः।
कर्माधिपेन च तथा चिन्तनं कार्यमायुषः ॥
षष्ठे व्ययेपि षष्ठेशो व्ययाधीशो रिपौ व्यये।
लग्नेऽष्टमे स्थितौ वापि दीर्घमायुः प्रयच्छति ॥
स्वस्थाने स्वांशकेनापि मित्रांशे मित्रमंदिरे।
दीर्घायुषं करोत्येव लग्नेशोऽष्टमपः पुनः ॥
लग्नाष्टमपकर्मेशमंदाः केन्द्रत्रिकोणयोः।
लाभे वा संस्थितास्तद्वत् दिशेयुर्दीर्घमायुषम् ॥
भेषु यो बलवांस्तस्यानुसारादायुरादिशेत्।

इत्यष्टमभावफलम्।

अथ नवमस्य—

भाग्याधिनाथोपि च भाग्यकर्ता,
शुक्रोपि पापैः सह चेत्त्रिषु स्यात्।

त्रिषडादिभावेषु च भाग्यहीनं,
केन्द्रत्रिकोणापगतोतिभाग्यम् ॥

अनेन धर्मः परिकल्पनीयः पिता तु चिन्त्यं निजमातुलस्य।
शुभे शुभस्थानगते शुभं स्याद्विपर्यये तत्र विपर्ययःस्यात्॥

इति नवमभावफलम्।

अथ दशमस्य—

कर्माधिपो बलोनश्चेत्कर्मवैकल्यमादिशेत्।
स हि केन्द्रत्रिकोणस्थो ज्योतिष्टोमादियागकृत्॥
अत्रायुषश्चिन्तनं च कार्यं स्यात्कर्मणस्तथा।
शत्रुनीचगृहं त्यक्त्वा षष्ठाष्टमगृहं तथा॥

इति दशमभावफलम्।

अथैकादशस्य—

लाभाधिपो यदा लाभे तिष्ठेत्केन्द्रत्रिकोणयोः।
बहुलाभं तदा कुर्यादुच्चः सूर्यांशगोपि वा॥

इत्येकादशभावफलम्।

अथ द्वादशस्य—

चन्द्रो व्ययाधिपो धर्मलाभमंत्रेषु संस्थितः।
स्वोच्चर्क्षनिजांशे वा लाभधर्मात्मजांशके॥
दिव्यागारादिपर्यंको दिव्यगन्धैकभोगवान्।
परार्थरमणो दिव्यवस्त्रमाल्यादिभूषणः॥

परार्थसंयुतो वित्तो दिनानि नयति प्रभुः ।
एवं स्वशत्रुनीचांशे अस्तांशे वाष्टमे रिपौ ॥
संस्थितः कुरुते जातं कान्तासुखविवर्जितम् ।
व्ययाधिक्यपरिक्लान्तं दिव्यभोगनिराकृतम् ॥
स हि केन्द्रत्रिकोणस्थः स्वस्त्रियालंकृतः स्वयम् ।
एवं भ्रात्रादिभावेषु तत्तत्सर्वं विचारयेत् ॥

इति द्वादशभावफलम् ।

अथ भावसमुच्चयस्य—

बली धनेशो धनकारकौ तथा,
बुधेज्यकौ केन्द्रसुतर्त्तभाग्यगौ ।
लाभे निजांशे यदि वा निजालये,
स्थितौ धनाढ्यं कुरुते नरं सदा ॥

विक्रमेशो बलाढ्यश्चेद्भ्रातृकारकखेचरः ।
केन्द्रत्रिकोणलाभोच्चस्वर्त्तस्वांशेषु संस्थितः ॥
दद्याच्च भ्रातरं तत्र सत्यशौचादिचिन्तनम् ।

बली ग्रहेशःसुखकारको बली, प्रयच्छति द्राग्बहुभोगमंदिरम् ।
अनेन सद्वाहनवेश्मबन्धुमात्रादिचिन्ता परिकल्पनीया ॥

इति पाराशरमुनिविरचिते केरलसारे द्वादशभावविचारः ।

ईदृशं भावफलं ग्रहाः स्वदशासु न दिशन्ति स्वसंबन्धिनां स्वसमानधर्मिणां चान्तर्दशासु दिशन्तीत्युक्तं श्लोकचतुष्टयेन दिशन्ति ग्रहाः सर्वे इत्यादिना ।

अन्यदपि चिन्तनमुक्तं ग्रन्थान्तरे--

लग्नाच्चिन्त्यं मूर्त्तिकीर्त्तिसाङ्गोपाङ्गनिरूपणम् ।
स्थितिः सुतसुसंपत्तिर्जन्मलग्नगते फलम् ॥
धनं सुखं च भुक्तिश्च सत्यं च बहुभाषणम् ।
सव्यनेत्राल्पहारश्च धनस्थानाद्विचिन्तयेत् ॥
भ्रातृकष्टौ त्रिक्रमश्च क्षुधाभरणपात्रवान् ।
भ्रातृस्थानफलं नाम तत्तन्नामफलं दिशेत् ॥
वाहनं बहुमातृंश्च सिंहासनसुखे ग्रहाः ।
बन्धुमित्रमिदं नाम चतुर्थस्थानमुच्यते ॥
पुत्रो बुद्धिश्च मन्त्रश्च देवता भक्तिरेव च ।
हृदयं मातुलश्चैव सुतस्थानाद्विचिन्तयेत् ॥
रिपुकान्तिबलं रोग उदारं शत्रुरेव च ।
षष्ठस्थानमिदं नाम तत्तन्नामफलं दिशेत् ॥
कलत्रं कामुकत्वं च दन्ता नाभिश्च रोगवान् ।
गुदं संकटके चैव आयुःस्थानाद्विचिन्तयेत् ॥
भाग्यं च तीर्थं धर्मं च पितृस्थानमिति क्रमात् ।
मानराज्यत्यक्तकीर्तिः कर्मव्यापारमेव च ॥
लाभं च ज्येष्ठभ्रातृंश्च कर्णजंघमिति क्रमात् ।
रिष्फव्ययं पितृधनं वादयोषादि नाम च ॥
इति भावनामानि ॥ ३२ ॥

अथ राजयोगारम्भकाले या दशा तत्र राजयोगस्य फलमाह—

आरंभो राजयोगस्य भवेन्मारकभुक्तिषु ।
प्रथयन्ति तमारभ्य क्रमशः पापभुक्तयः ॥३३॥

आरंभ इति । मारको द्वितीयसप्तमेशस्तस्य भुक्तिषु अन्तर्दशासु राजयोगस्य यदारम्भो भवेत् तदा पापभुक्तयः पापग्रहाणामन्तर्दशास्तं राजयोगारम्भकालमारभ्य प्रथयन्ति राजानमतिप्रथामात्रयुक्तं कुर्वन्ति । राजयोगप्रभावाद्राजेति प्रसिद्धस्तु । भवति मारकग्रहभुक्तिवशात्तु राज्यसुखादितेजो बलवृद्ध्यादिकं किमपि न भवतीति भावः।क्रमश इति कथनाद्दिने दिने प्रथा वृद्धिरिति ज्ञाप्यते ॥ ३३ ॥

पापग्रहाणामन्तर्दशासु राजयोगारम्भस्य फलमुक्त्वा शुभग्रहाणामन्तर्दशासु राजयोगारंभफलमाह—

तत्संबन्धिशुभानां च तथा पुनरसंयुजाम् ।
शुभानां तु समत्वेन संयोगो योगकारिणाम्॥३४॥

तत्संबंधि शुभानामिति । तत्पदेन राजयोगकारकग्रहः तस्य संबन्धिनः सहावस्थानाद्यन्यतमसंबंधविशिष्टाः शुभाः शुभग्रहास्तेषां भुक्तिषु राजयोगारंभे सति तथा क्रमशः प्रथयंति तमारभ्य राज्यसुखतेजोबलादीनां दिने दिने वृद्धिं कुर्वन्ति । यद्यप्युत्कर्षबोधकं पदं नास्ति तथापि असंयुजां शुभानां तु समत्वेनेति वक्ष्यमाणत्वादत्रोत्कृष्टत्वेनेति विवक्षितं पूर्वं तु अपकृष्टत्वेनेति बोध्यं समयोगफलमेवाह—पुनरसंयुजामिति— न संयुज्यन्ते इति असंयुजः संबन्धसामान्यरहितास्तेषां

योगकारिणां शुभानां तु ग्रहाणां अन्तर्दशायां यदि राजयोगारंभ इति पूर्ववदेव संबन्धः । अत्र योगे समत्वेन प्रथयन्ति । नाप्यपकर्षो नाप्युत्कर्ष इति साम्यमेव राजसुख-तेजोबलवृद्ध्यादौ भवतीत्यर्थः, अयं श्लोकद्वयार्थः । राजयोगस्य फलं राज्यप्राप्त्यादि तत्त्रिविधं उत्कृष्टं मध्यं नीचं च । तत्र पापभुक्तिषु राजयोगारंभे नीचमुत्कर्षादिहीनमेव फलं प्रथामायाति । शुभभुक्तिषु तदारंभे मध्यममेव फलं प्रथितं स्यादिति ॥ ३४ ॥

अथ राजयोगकारकस्यैव दशायां विशेषमाह—

शुभस्यास्य प्रसक्तस्य दशायां योगकारकाः ।
स्वभुक्तिषु प्रयच्छन्ति कुत्रचिद्योगजं फलम् ॥ ३५ ॥

शुभस्येति । अस्य योगकारकस्य शुभस्य शुभग्रहस्य प्रसक्तस्य संबन्धविशिष्टस्य दशायां योगकारकग्रहाः स्वभुक्तिषु स्वान्तर्दशासु कुत्रचित् कदाचित् योगजं राजयोगसमुद्भवं फलं प्रयच्छन्ति । राजयोगकारकग्रहदशायां यदा योगकारक-ग्रहस्यान्तर्दशा समायाति तदा फलं भवतीत्यर्थः ॥ ३५ ॥

राहुकेतुविषये विशेषमाह—

तमोग्रहौ शुभारूढावसंबन्धेन केनचित् ।
अन्तर्दशानुसारेण भवेतां योगकारकौ ॥ ३६ ॥

तमोग्रहाविति । तमोग्रहौ राहुकेतू शुभारूढौ केन्द्र-त्रिकोणान्यतमस्थानगतौ यदि भवेतां तदा अन्तर्दशानुसारेण योगकारकग्रहस्य यदान्तर्दशा भवति तदा योगकारकौ भवेतां

योगजं फलं दिशेतामित्यर्थः । अयं भावः । योगकारकग्रह-संबंधरहितत्वेपि शुभस्थानारूढत्वमात्रेण राहुकेतू राजयोग-फलं दिशतः; परन्तु राजयोगकारकस्य ग्रहस्य यदान्तर्दशा भवति, तत्रापि शुभस्यान्तर्दशा चेदुत्कृष्टम्, अशुभस्यान्तर्दशायां हीनमित्यादिपूर्ववदूहनीयम् ॥ ३६ ॥

पापा यदि दशानाथाः शुभानां तदसंयुजाम् ।
भुक्तयः पापफलदास्तत्संयुक्शुभभुक्तयः ॥३७॥

पापा यदीति । दशानाथा यदि पापा अशुभग्रहाः स्युस्तदा तदसंयुजां दशानाथसंबन्धरहितानां शुभानां पापग्रहाणा-मन्तर्दशासु भुक्तयः योगकारिणां भुक्तयः पापफलदा भवन्ति । संबन्धसहितानां तु प्राह—तत्संयुक् शुभभुक्तय इति । दशा-नाथसंबंधिशुभग्रहभुक्तयस्तु मिश्रफलदा भवन्ति इत्यग्रिमश्लोक-स्थेन संबन्धः, योगकारिणां पापिनां दशानाथसंबन्धरहितानां तु भुक्तयोऽत्यन्तपापफलदा अशुभफलदायिन्यो भवन्ति । पापा यदि दशानाथा इत्यस्य सर्वत्रान्वयो वेदितव्यः ॥३७॥

भवन्ति मिश्रफलदा भुक्तयो योगकारिणाम्
अत्यन्तपापफलदा भवन्ति तदसंयुजाम् ॥३८॥

भवन्तीति । पूर्वश्लोकेन सहास्यार्थ उक्तः अयं श्लोक-द्वयार्थः । पापग्रहदशायां पापिनो दशाधीशस्यासंबंधी यः शुभ-ग्रहस्तस्यान्तर्दशायां न शुभं फलं भवति । पापिनो दशानाथस्य संबंधी यः शुभग्रहस्तस्यान्तर्दशायामप्यशुभं फलं भवति पापिनो दशानाथस्य यः संबंधी पापग्रहस्तस्यान्तर्दशायामत्यन्तम-शुभमिति ॥ ३८ ॥

अथ मारकस्य भुक्तिवशान्मारकत्वात् मारकत्वमुपदिशति—

सत्यपि स्वेन संबन्धे न हन्ति शुभभुक्तिषु ।
हन्ति सत्यप्यसंबन्धे मारकः पापभुक्तिषु ॥३९॥

सत्यपीति । स्वेन संबंधे परस्पराश्रयादिलक्षणे सत्यपि शुभभुक्तिषु शुभग्रहान्तर्दशायां न हन्ति न मारयति । असत्यपि स्वेन संबंधे पापभुक्तिषु हन्ति । सत्यप्यसंबंधे इत्यस्यासंबन्धे सतीत्यन्वयः । अयं भावः—मारकग्रहदशायां यदि शुभग्रहस्यान्तर्दशा भवति तदा न मारयति, संबंधस्त्वत्र न प्रयोजकः । यदि तु पापग्रहस्यान्तर्दशा भवति तदा मारयत्येव न संबंधमपेक्षित इति ॥ ३९ ॥

अथ शनिभार्गवयोर्भुक्तिव्यत्ययेन शुभाशुभफलप्रदत्वमाह—

परस्परदशायां च स्वभुक्तौ सूर्यजभार्गवौ ।
व्यत्ययेन विशेषेण प्रदिशेतां शुभाशुभम् ॥४०॥

परस्परेति । सूर्यजभार्गवौ शनिशुक्रौ परस्परदशायां शनिः शुक्रदशायां शुक्रः शनिदशायाम् । शनिः स्वदशायामित्यादिस्तु नार्थः स्वदशायाः परस्परदशात्वाविरहात् । तथा च शनिः शुक्रदशायां स्वभुक्तौ स्वीयान्तर्दशाकालेन व्यत्ययेन वैपरीत्येन अर्थाच्छुक्रस्यैव शुभमशुभं वा फलं ददाति, एवं शुक्रः शनिदशायां स्वान्तर्दशाकाले शनेरेव शुभमशुभं वा फलं ददाति; इदमपि विशेषेण विशेषरूपेण न तु सामान्यरूपेणेति ॥ ४० ॥

अथ विख्यातिकारकं राजयोगमाह—

लग्नकर्माधिनेताराावन्योन्याश्रयसंस्थितौ ।
राजयोगाविति प्रोक्तं विख्यातो विजयीभवेत्॥४१॥
धर्मकर्माधिनेताराावन्योन्याश्रयसंस्थितौ ।
राजयोगाविति प्रोक्तं विख्यातो विजयी भवेत्॥४२॥

लग्नकर्माधीति । कर्मलग्नाधिनेतारौ दशमेशजन्मलग्नेशौ अन्योन्याश्रयसंस्थितौ अन्योन्यस्य परस्परस्य आश्रयः स्थानं तत्र संस्थितौ कर्मेशो लग्नस्थाने लग्नेशः कर्मस्थाने स्थितो यदि स्यात् तदा राजयोगाविति, राजयोगकारकौ स्त इत्यर्थः । ततः किमित्याह । विख्यात इति । अस्मिन् योगे जात इत्यध्याहारः ॥ विख्यातः विशिष्टख्यातिमानाविजयी-संग्रामविवादादिषु जयशाली स्यादिति । अथ राजयोगान्तर-माह । धर्मकर्माधिनेतारौ नवमदशमभावेशौ अन्योन्याश्रय-संस्थितौ, धर्मेशः कर्मभावे कर्मेशो धर्मभाव इत्येवं यदि स्यात्तदा तौ राजयोगकारकाविति प्रोक्तं शास्त्रे कथितम् । अस्मिन्नपि योगे पूर्वोक्तमेव फलमित्याह । विख्यातो विजयी भवेदिति । वीर्यवान् विजयी भवेदिति क्वचित्पाठः स्पष्टार्थः ॥ ४१-४२ ॥

इति श्रीउडुदायप्रदीपेऽन्तर्दशाध्यायःसंपूर्णः । समाप्तोऽयंग्रन्थः॥

अथ ग्रहस्वभावाद्द्रष्टव्यानि फलान्युच्यन्ते—

(१) राजविद्रुमरक्तवस्त्रमाणिक्यराज्यवनपर्वतक्षेत्रपि-
तृकारको रविः ॥

(२) मातृमनःपुष्टिगन्धरसेक्षुगोधूमक्षारकुद्विजशक्तिका-
यसस्यरजतादिस्वादिकारकश्चन्द्रः ॥

(३) सत्वसद्मभूमिपुत्रशीलचौर्यरोगब्रह्मभ्रातृपराक्रमा-
ग्निसाहसराजशत्रुकारकः कुजः ॥

(४) ज्योतिर्विद्यामातुलगणितकार्यनर्तनवैद्यहासभीः
श्रीशिल्पविद्यादिकारको बुधः ॥

(५) स्वकर्मयजनदेवब्राह्मणधर्मग्रहकाञ्चनवस्त्रपुत्रमित्रा-
न्दोलनादिकारको गुरुः ॥

(६) कलत्रकार्मुकसुखगीतशास्त्रकाव्यपुष्पसुकुमारयौव-
नाभरणरजतयानवर्गलोकमौक्तिकविभवकवितार-
सादिकारकः शुक्रः ॥

(७) महिषहयगजतैलवस्त्रशृंगारप्रयाणसर्वराज्यसर्वायु-
धग्रहयुद्धसंचारशूद्रनीलमणिविप्रकेशशिल्पशूलरो-
गदासदासीजनायुष्यकारकः शनिः ॥

(८) प्रयाणसमयसर्परात्रिसकलसुखार्थकताद्यूतकारको
राहुः ।

(९) व्रणरोगचर्मार्तिशूलस्फोटक्षुधार्तकारकःकेतुरिति ॥

अथ ग्रहशान्तिः ।

माणिक्यगोधूमसवत्सधेनुं कौसुंभवस्त्रं घृतहेमताम्रम् ।
आरक्तचोलेन घृतं धनं वा वदन्ति दानादि विरोचनाय ॥
शंखं सपात्रं सितचामरञ्च कर्पूरमुक्ताफलशुभ्रवस्त्रम् ।

युगोपवीतं वृषभं च रौप्यं चन्द्राय दद्याद् घृतपूर्णकुंभम् ॥
प्रवालगोधूममसूरकाश्च वृषोऽरुणोप्याढककाः सुवर्णम् ।
आरक्तवस्त्रं करवीरपुष्पं ताम्रं च भौमाय वदन्ति दानम् ॥
नीलं च चैलं कलधौतकांस्यं मुद्गाज्यगारुत्मकसर्वपुष्पम् ।
दासी च दन्तो द्विरदस्य नूनं वदन्ति दानं विधुनंदनाय ॥
शर्करा च रजनी तुरङ्गमः पीतधान्यमपि पीतमम्बरम् ।
पुष्परागनवरत्नकाञ्चनं प्रीतये सुरगुरोः प्रदीयताम् ॥
चित्राम्बरं शुभ्रतरस्तुरङ्गो धेनुश्च वज्रं रजतं सुवर्णम् ।
सतण्डुलाज्योत्तमगंधयुक्तं वदन्ति दानं भृगुनन्दनाय ॥
माषाश्चतैलं विमलेन्द्रनीलं तिलाकुलत्था महिषी च लौहम् ।
गौश्चासितेति प्रवदन्ति दानं कृष्णं च दद्याद्रविनन्दनाय ॥
गोमेदरत्नं च तुरङ्गमश्च सुनीलचैलादि सकंबलं च ।
तिलाश्च तैलं खलु लौहयुक्तं स्वर्भानवे दानमिदं वदन्ति ॥
वैदूर्यरत्नं सतिलं सतैलं सुकंबलं चापि मदो मृगस्य ।
वस्त्रं हि केतोः परितोषबीजमुदीरितं दानमिदं मुनीन्द्रैः ॥
जपहोमग्रहोपास्तिदेवद्विजगवार्चनैः ।

नश्यत्यमङ्गलं सर्वं कुदशाग्रहसंभवमिति ॥

यद्वंशे नहि मूढतामुपगतो नापंडितो नाधनो
नो दीनो न च दुःखितो न तपसा हीनो न वा दुर्बलः ।
नापूज्यो न च राजमानविधुरो नासंततिर्नामतिः
सोऽयं सूरिपराशरो मुनिवरो वर्वर्ति सर्वोपरि ॥

तदन्वये शुद्धमतिः समान्यः सद्वासनाढ्योधिषणाधनाढ्यः।
पाण्डेयनामागिरिधारिलालो वृन्दावनोदेशलसज्जरोल्याम्॥
तस्यात्मजः कुन्दनरामशर्मा तदात्मजोऽभूद्धरिरामशर्मा।
तदात्मजः स्वान्तनिविष्टरामः सिद्धान्तविद्भैरवदत्तसूरिः॥
अकारि तेनायमुडुप्रदीपोद्योतो गुरूक्तिप्रतिषिद्धदोषः।
विद्वज्जनानां गुणसद्धनानां भवेदनायासविलासहेतुः॥

अभूद्भैरवसूक्तीनां लिपिकृद्धरणीधरः।
महाभारतनिर्माणे व्यासस्येव गणेश्वरः॥

इति ग्रहशान्तिः।

श्रीगणेशाय नमः

सज्जन-रञ्जनी ।

अथोडुदायप्रदीपो व्याख्यायते—

श्रीमतिमन्नृहरिं प्रणम्य भक्त्यासुहृदां हृत्कमलप्रकाशहेतोः ।
उडुदायोत्थफलप्रदीपटीका क्रियते सज्जनरञ्जनी मयैषा ॥१॥

पराशरमतागमार्थगहनोदधिक्रोडगा,
शुभाशुभफलावलीघनवृतेन्दुबिम्बप्रभा ।
पुरातनकथाः कथं कथयितुं क्षमार्धीभिमे
त्यजस्त्रमनुधावतीव हि न याति पारं यतः ॥ २ ॥

न पदच्छेदपदार्थविग्रहार्थान्वयसद्भावनिरुक्तियुक्तबुद्धिः ।
कुतआत्तपसमाधृतिस्तथापीरयतिश्रीगुरुर्गीर्लिखेत्यजस्रम् ३

पराशरपराऽपारापाराशरपरम्परा ।
गुरोर्गीः श्रुतिगारूत्था लिपिरूपा वहत्यसौ ॥ ४ ॥
अस्य विप्रतिपत्त्युक्तौ योग्यत्वं न बृहस्पतेः ।
का कथाधुनिकानां सा प्रोतोत्ताकल्पमादृशाम् ॥ ५ ॥
अतो गुरूक्ता व्याख्यैव न्यस्तेयं न स्वकल्पिता ।
अत आगमवन्मान्या स्वकल्याणमभीप्सुभिः ॥ ६ ॥

अथ पराशरमतानुभवितान्तःकरणः कश्चित्कविस्तदुडुदायप्रदीपाख्यं ग्रंथं कर्तुमुद्यतः स्वेष्टदेवं प्रणमति—

सिद्धान्तमिति—वीणाधरमिति विशेषणात् किञ्चि-

न्महोऽर्थात्सरस्वतीरूपं तेजः सरस्वतीति यावत् तस्या एव वीणाधारित्वात् । तदुपास्महे, तत्किंभूतं औपनिषदं सिद्धान्तं उपनिषद्ब्रह्मभागप्रतिपाद्यं सिद्धान्तं ब्रह्मस्वरूपमित्यर्थः । तस्य ब्रह्मभागप्रतिपादकत्वात् । पुनश्च परमेष्ठिनो ब्रह्मणः शुद्धान्तं अन्तःपुररूपं 'शुद्धान्तश्चावरोधश्चेत्यमरः' । पुनः शोणाधरं शोणौ रक्तावधरौ यस्य तदिति । ईदृशं किञ्चिदनिर्वचनीयं उपास्महे ध्यानधारणादिना उपासनाविषयं कुर्मो भजाम इत्यर्थः ॥ १ ॥

अथ पराशरमतमवलम्ब्य ग्रंथं कर्तुमुद्यतोऽस्मि इति प्रतिज्ञा प्रकाशनायाह——

वयमिति——वयं यथाश्रुति पाराशरीं होरामनुसृत्य तन्मतं पर्यालोच्य, दैवविदां प्राग्जन्मार्जितसदसद्रूपं दैवं विदन्ति जानन्ति इति दैवविदो होराशास्त्रनिपुणा दैवज्ञास्तेषां मुदे हर्षाय उडुदायप्रदीपाख्यं ग्रन्थं कुर्मः। उडूनां नक्षत्राणां दाया आयुर्विभागास्त एव प्रदीपा यस्मिन् तस्मिन्नित्युडुदायप्रदीपस्तदेवाख्या नाम यस्य तदुडुदायप्रदीपाख्यमित्यर्थः । अथात्र कर्तर्येकस्मिन्कथं वयमिति बहुवचनमित्युच्यते——होराकृत्पराशरमुनिस्तत्पावको निजगुरुस्तच्छिक्षया ज्ञाताखिलग्रंथार्थतत्त्वो ग्रंथकृच्चेति——तत्कथमिति चेत्, मुनिवाक्यस्वरसागुरूदितयुक्त्या स्वकीयभावेन च त्रिभिर्योजनाकरणे शास्त्रतत्त्वमवगतं, तत्तु त्रिभिः संपादितं भवतीति मनस्याधाय वयमित्युक्तं ग्रंथकृता, न तु स्वोत्कर्षेण बहुवचनमिति ॥ २ ॥

अथात्र सिद्धा उडुदायेनेति——जैमिनीमताद्यद्यपि सर्वे

उडुदायाः समागतास्तथाप्यत्र विंशोत्तरीदशाधीनफलमुक्तं पराशरमुनिनेति तत्त्वम्। अतः फलानीति श्लोके श्लोकार्धमधिकं पठन्ति । अष्टोऽशायुःप्रभृतिसकलमुन्येकमतादितायुर्दायमपहाय केवलमुडुदायकथने किं मानमिति चेदुच्यते।

'योगायुः कीर्तितं सत्ये त्रेतायामाश्रयागतम्।
द्वापरेंऽशायुरादीनि कलौ नक्षत्रजा दशा इति ॥'

अन्यदपि—

'सन्त्यनेकानि चायूंषि मुन्युक्तानीह जातके।
अन्यान्याभासमात्राणि कलौ नाक्षत्रिकं विनेति ॥'

पराशरादिप्राचीनवाक्यात्सन्त्यथैवमुडुदायास्त्रिविधा अष्टोत्तरी, विंशोत्तरी, योगिनी चेति। ताः प्रत्येकं नवधा—

'नक्षत्रजा दशा प्रोक्ता नवधा भुवि भेदतः।
त्रिविधास्ताः क्रियाभेदाज्ज्ञात्वा ताभ्यः फलं वदेत्॥'

क्रियाविधानमप्युक्तमनेकविधं अष्टोत्तरीविंशोत्तरी दशोक्तरीत्या वैलक्षण्येन कथमियं योगिनी त्रिविभागविभक्तेति नाशङ्कनीयम्, दीर्घायुर्मध्यायुरल्पायुर्भेदवशादिति ज्ञेयम्। तदुक्तं वृद्धैः—

'षट्त्रिंशात्पूर्वमल्पायुर्मध्यायुश्च ततो भवेत्।
द्विसप्तत्या पुरस्तात्तु ततो दीर्घमुदाहृतमिति ॥'

एवं त्रिविधासु दशास्वस्मिन्ग्रंथे विंशोत्तरी दशैव स्वीकृतास्तीति न त्वष्टोत्तरीदशेति, तत्र किं मानमिति तदाह—

'अतः कलौ खाक्षिधरासमा नृणामायुः शराहं मुनयो

वदन्ति' इति होराम्नायाद्युक्तत्वादुडुदायानां मध्ये विंशोत्तरी-दशायाः प्राधान्यादत्र विंशोत्तरी दशा स्वीकृतेति भावः। तत्र विंशोत्तरी दशानयने प्रक्रिया त्रिविधा आद्यस्यैवानुपातः, सर्वेषामनुपातः, सर्वेषामंशेनानुपातश्चेति तदानयनप्रकारान् ग्रंथांतरादग्रे वक्ष्यामः ॥ ३ ॥

बुधैरिति—भावादयः सर्वे विचाराश्रयीभूतपदार्थाः भावार्थ-संज्ञास्वरूपजात्यादयो राशिप्रभेदग्रहयोनिभेदमित्रामित्रमूल-त्रिकोणोच्चनीचादिबलाबललक्षणानि सामान्यशास्त्रतो भययवनमणित्थाद्युक्तग्रंथेभ्यो ज्ञातव्यानि। एतच्छास्त्रेति एतच्छास्त्रोक्तरीत्या विशेषेण संज्ञाः ब्रूमः काश्चिदिति ॥ ४ ॥

अथ सामान्यशास्त्रे विशदीकृत्योदितायामपि दृष्टौ यो विशेषस्तमेवास्मिन् शास्त्रे ब्रूम इति प्रतिज्ञातत्वादत्राह—

पश्यन्तीति—सर्वे सूर्यादयो राह्वन्ता ग्रहाः सप्तमं सप्तमं भवनं पश्यंति स्वाधिष्ठितस्थानतो यत्सप्तमं भवनं तच्च तत्स्थ-ग्रहांश्च पश्यन्तीत्यनेनान्या दृष्टिर्नापेक्षिता इत्यतोऽस्मिन् शास्त्रे पूर्णैव दृष्टिः स्वीकृता न तु चरणदृष्टिरिति। कथमित्थ-मिति चेद्यो विशेषस्तं ब्रूम इति प्रतिज्ञातत्वादवसेयम्। पुनर्भूयोऽपि विशेषतः शनिजीवकुजाः त्रिदशत्रिकोणचतुरष्ट-मानपि पश्यन्ति, तृतीये दशमे शनिः पूर्णं पश्यति, एवं जीवो गुरुस्त्रिकोणे नवपंचमे च पूर्णं पश्यति, एवं कुजो भौमोऽपि चतुरष्टमान् चतुर्थेऽष्टमे च पूर्णं पश्यति। अयं भावः शनि-जीवकुजानां त्रिदशत्रिकोणचतुरस्रक्रमेण पूर्णा दृष्टिः सप्तमे च अन्येषां सप्तमे एव पूर्णा नान्यत्रेत्यर्थः। अत्र विशेषत इति पदोपादानादत्रापि सर्वपदेन सप्तमं पूर्णदृशा शनिजीवकुजाः

पश्यन्ति । तथापि सप्तमदृष्ट्यपेक्षया पुनर्विशेषविधानात्किञ्चिदधिकं फलं प्रयच्छन्तीति भावः । अत एवोक्तं वराहेण—'क्रमशो भवन्ति किल वीक्षणेऽधिकाः' इति । अथात्र सर्वशब्दोपादानाद्राह्वन्तानां दृष्टिरुक्ता न तु केतोरिति भावः । तत्कथमिति चेत्केतोर्दृगभावात् । तदुक्तं यामलादौ—'शिरोमात्रं विधुंतुद' इति । 'पुच्छं केतुरुदीरित' इति राहोः शिरोमात्रेऽपि दृक्सद्भावात्केतोस्तदभावादिति ॥ ५ ॥

अथ चतुर्भिर्ग्रहाणां शुभाशुभत्वमाह—

सर्व इति—त्रिकोणनेतारो नवपंचमाधिपाः सर्वे सूर्यादयो नवग्रहाः शुभफलप्रदातारः शुभा इत्यर्थः । ननु राहुकेत्वोराधिपत्याभावात्कथं नवग्रहा इति चेत्तत्राह भुवनदीपके—'यद्बुधस्य गृहं स्वोच्चं राहोस्तद्गृहमुच्यते' अन्यत्रापि—'कन्याराहुगृहं प्रोक्तं तदुच्चं मिथुनं स्मृतमिति'

अन्यच्च—राहुच्छाया स्मृतः केतुर्यत्र राशौ भवेदयम् ।
तस्मात्सप्तमगः केतुस्तद्भवं वैसारणी यत इति ॥

अत एव राहुकेत्वोः स्वगृहत्वमुच्चत्वं च युगपदेवेति सार्वजनीनम् । यथा—अतस्त्रिकोणनेतारः शुभाः पापाश्च सर्वे शुभफला एव भवंति न कदाचिदशुभफलप्रदा भवन्तीत्यवसेयम् । यदीति पादपूरणे हेत्वर्थे च । त्रिषडायानां तृतीयषडेकादशानां भावानां पतयः स्वामिनस्तु पापफलप्रदाः पापा इत्यर्थः । तेन त्रिषडेकादशानां पतयो यदि पापास्तर्हि शुभफलप्रदा न भवन्तीत्यर्थः । अत्रेयान् विशेषः—यदि चेत्तृतीयषडायपतयस्तत्र तत्र स्थिताः, तृतीयाधिपः पापा-

स्तृतीयस्थः, षष्ठाधिपः पापः षष्ठस्थः, आयाधिपः पापः आयस्थस्तर्हि अशुभफलप्रदा न भवंति, तद्भिन्नस्था एवाशुभा इत्यर्थः—तत्रापीयान् विशेषः—'वृश्चिके तु न तच्छुभ' इति अस्यार्थः यो वृश्चिकलग्ने जातस्तस्य षष्ठभवनं मेषस्तदधिपतिर्यदि मेषराशौ षष्ठस्थो भौमः स्यात्तर्हि सुतरामशुभ एवेत्यर्थः। अत्र प्रमाणानि—

'उद्दिष्टफलतत्त्वज्ञाः संति लोके बुधा अपि।
अनुद्दिष्टेपि तत्त्वज्ञा आम्नायां किंतु दुर्लभाः॥'

अत एवोक्तं—'पारम्पर्यमिदं गुरोः'। अत एवोक्तं मूले—'अस्तु वा मास्तु गणितं गुरूद्दिष्टं प्रमाणमदिति।' अत्र गणितमित्युपलक्षणम्; त्रिस्कंधे तस्यैवोत्कर्षत्वात्। अत्र केचित् त्रिकोणनेतारो यदि त्रिषडायानां पतयः स्युस्तदा पापफलप्रदा इति व्याख्यां कुर्वन्ति तदसत्। कथं कर्ककन्ययोस्तद्वत्त्वं भवत्येवेति चेत्तदन्ययोगे गगनकुसुमायमानत्वादिति ब्रूमः। कथमहो कर्के तु नवमो गुरुः षष्ठेशोऽपि गुरुरतः पापत्वाभावाच्छुभमेवागतमित्यवगन्तव्यम्। कन्यायाः पञ्चमेशः शनिः षष्ठेशोऽपि शनिः तत्र तु ते शुभमित्येव फलमागतमिति भ्रमो नोऽभिज्ञानां, तत्र शुभाशुभयोस्तुल्यफलविरोधान्नाश एव।

तदुक्तं वराहेण—

'एकग्रहस्य सदृशे फलयोर्विरोधे नाशं व्रजेत्' इत्याद्यनुशासनेनैव गतार्थत्वान्न तादृशोऽर्थः संगच्छते॥ ६॥

अथ केन्द्राधिपवशात्सदसत्फलान्याह—

न दिशन्तीति—सौम्याः पूर्णेन्दुबुधगुरुशुक्राः यदि केन्द्र-

चतुष्काधिपाः स्युस्तदा ते शुभं फलं न दिशन्ति । केन्द्राणि लग्नचतुर्थसप्तमदशमभावास्तेषामधिपा यदि भवेयुस्तदाशुभं फलं न प्रकुर्वन्ति, किन्त्वशुभमेव कुर्वन्तीत्यर्थः । क्रूराः सूर्यक्षीणेन्दुभौमशनैश्चराश्चेत्केन्द्राधिपाः स्युस्तर्ह्यशुभं न दिशन्ति, किंतु शुभफलमेव दिशन्तीत्यर्थः । कथमीदृगिति नाशङ्कनीयम् । अत्रेयं व्यवस्था—मेषलग्ने जातस्य पुंसः शुक्ले भौमशनैश्चरौ सत्फलदौ, चन्द्रशुक्रावशुभफलप्रदौ, कृष्णे चेच्चन्द्रभौमशनैश्चराः सत्फलदाः । एवं वृषे जातस्य सूर्यभौमशनैश्चराः सत्फलदाः, शुक्रस्त्वशुभफलदः । एवं मिथुने जातस्य न केऽपि शुभफलदाः । एवं कर्कतुलामकराणां मेषवत् । सिंहवृश्चिककुम्भानां वृषवत् । कन्याधनुर्मीनानां मिथुनवत् इति ज्ञेयम् । एतेन किमागतमिति द्विःस्वभावजातपुरुषापेक्षया चरलग्नजः शुभफलभोक्ता शुक्ले, तदपेक्षया कृष्णे चरलग्नजो भाग्याधिकस्तदपेक्षया स्थिरलग्नभवः सुखीति प्रथमतो मनस्याधाय शुभाशुभयोर्न्यूनाधिकत्वं ज्ञात्वा केन्द्राधिपत्यलक्षितपापग्रहदशायां प्रकृत्या पापग्रहस्याशुभत्वे सत्यप्यशुभफलं न भवति, किंतु पापदशायामपि शुभफलमेव भवतीत्यवगन्तव्यम् । एवं केन्द्राधिपत्यलक्षणालक्षितस्य शुभग्रहस्य दशायां प्रकृत्या शुभफलत्वे सत्यपि शुभफलं न भवति, किंत्वशुभफलमेव भवतीत्यवगन्तव्यम् । एवं सति द्विःस्वभावलग्नजातस्य बुधजीवदशा सर्वदैवाशुभफला न कदाचित्सत्फलदा, पापानां तु दशा प्रकृत्या शुभफला न भवत्यतः सर्वदैव दुःखी स्याद्द्विःस्वभावज इति चेन्न अत्रेयान्विशेषः—यदि चेत्केन्द्रपतयस्तत्र तत्र स्थितास्तर्हि अवि-

चारितरमणीयाः शुभाः । पापाश्चेद्विचारितरमणीयाः, यत्केन्द्राधिपो यः शुभः स यदि तत्रस्थस्तर्हि तत्केन्द्रजं फलं भावविचारितरमणीयं भवति, तद्भिन्नकेन्द्रे चेद्विचारितरमणीयं भवतीति मनस्याधाय सौम्ये केन्द्रेशे पणफरापोक्लिमस्थे सतीदृक् फलमिति तत्त्वम् । तेन यदि केन्द्राधिपाः सौम्याः पणफरापोक्लिमगा भवन्ति तर्हि नृणां शुभफलं न दिशन्ति, अथ यत्केन्द्राधिपः पापः स यदि तत्केन्द्रस्थस्तर्हि विचारितरमणीयं तत्केन्द्रजं फलं दिशति । पापे केन्द्रेशे पणफरापोक्लिमस्थे सतीदृक् फलमित्यतः शुभं फलं भवतीति वदन्ति बहवस्तत्रापीत्थं भाति—लग्नेशः पापो लग्नगः शुभफलकृत्, कर्मेशः पापः कर्मगः शुभफलकृत्, चतुर्थेशः पापश्चतुर्थगस्तद्भावफले किञ्चिन्न्यूनतां करोत्येव । एवं सप्तमेशः पापः सप्तमगो भूयो विवाहमृच्छति ! प्रबलश्चेद्भार्याभर्त्रोर्निःस्नेहकृदित्यादि-सामान्यशास्त्रावगतं फलं मनस्याधायास्मिन् ग्रन्थे यो विशेषः स एवात्रोक्तविधिना विचारणीयो बुद्धिमद्भिः । अत एवोक्तम्—

'क्रूराः कुर्वन्ति दारिद्र्यं त्रिकोणकण्टकाश्रिताः ।
एवं केन्द्रे शुभाः सर्वे सद्यो लाभकराः स्मृताः ॥'

इति पराशरजातके स्फुटवाक्यदर्शनात् । अत्र केन्द्रत्रिकोणगाः शुभाः, केन्द्रेशभिन्नाः खेटाः केन्द्रस्था ग्राह्या इति चेन्न—

'स्वर्क्षतुङ्गत्रिकोणस्था मित्रर्क्षांशगता अपि ।
यावन्त आश्रिताः केन्द्रे ते सर्वेऽन्योन्यकारकाः ॥'

इति तत्रैवोक्तत्वात् । अनन्तरं एते प्रबला उत्तरोत्तरा

इति—एते त्रिकोणनेतारस्त्रिषडायपतयः केन्द्राधिपाश्च त्रिविधास्ते हि यत्स्वकीयगणे उत्तरोत्तराः सन्तः प्रबलाः बलिनो भवन्तीत्यर्थः। एतेनैतदुक्तं भवति—त्रिकोणनेत्रपेक्षया त्रिषडायाधिपा बलिनस्तदपेक्षया केन्द्रनेतारो बलिनस्तेष्वपि पञ्चमेशान्नवमेशस्तृतीयेशात्षष्ठेशः षष्ठेशादेकादशेशः लग्नेशाच्चतुर्थेशः तस्मात्सप्तमेशस्तस्माद्दशमेश इत्यनया दिशा बलिनो ज्ञातव्याः। तदुक्तम्—त्रिकोणपतयः सर्वे त्रिषडायाधिपाः शुभाः। लग्नर्द्ध्यस्तस्वपाः पापाः बलिना स्युर्यथोत्तरमिति ॥ ७ ॥

अथेभ्य उर्वरितद्वितीयरिष्फभावयोः सदसत्फलं विवेक्तुं किञ्चिदाह—

लग्नादिति—लग्नाज्जन्मलग्नाद्व्ययाद्वितीयेशौ द्वादशद्वितीयभावस्वामिनौ परेषां तत्तच्छुभाशुभभावेशसाहचर्यतः संबन्धेन स्वशुभाशुभराश्यन्तराधिपतित्वास्थितत्वानुरूपेण च फलदायकौ भवतः शुभाशुभफलप्रदौ स्याताम्। अत्र शुभाशुभत्वमत्रोक्तरीत्यैव ज्ञेयं, नान्येभ्यो जातकशास्त्रेभ्यः। एवं च ग्रहान्तरसंबन्धस्य राश्यन्तरसंबन्धस्य स्वकीयराश्यन्तरस्य भावेन मुक्तिप्राधान्येन फलागमकत्वमूह्यम्। संबन्धलक्षणं विशेषतो वक्ष्यति पश्चात् ॥ ८ ॥

भाग्यव्ययाधिपत्येनेति—रन्ध्रेशो लग्नादष्टमभावाधीशो भाग्यव्ययाधिपत्येन भाग्यभावापेक्षयाऽष्टमभावस्य तद्व्ययस्थानत्वाद्भाग्यव्ययाधिपत्यं सिद्धमतो भाग्यव्ययाधिपत्येन हेतुना शुभफलप्रदो न भवति, किंतु भाग्यव्ययकारकत्वमेवातोऽशुभफलप्रद एव भवतीत्यर्थः। स एव ग्रहश्चेत्स्वयं

लग्नाधीशोऽपि भवेत्तस्यैव लग्नाधीशता यदि भवेत्तदाशुभ-फलसंधाता शुभफलस्यैव कर्त्ता भवतीत्यर्थः। ईदृग्योगो मेषलग्ने तुलालग्ने वा जातस्य नेतरेषामिति। एकस्यैव लग्नाधीश-रन्ध्राधीशत्वात्। एवं सत्यपि केवलं शुभो न भवति इत्य-वसेयम्। द्विस्वामिकत्वात् केवलाष्टमाधीश इव पापो न भवतीति। अथ यदि भाग्यव्ययाधिपत्यमष्टमेशस्येति दिशा सर्वेषु भावेषु अनया दिशा तत्तद्भावव्ययाधिपत्यं च ज्ञेयं यद्भावस्य व्ययाधिपत्यं येन ग्रहेण प्राप्तं स ग्रहस्तद्भावनिष्ठं यत्फलं तन्नाशको भवतीति मनस्याधाय शुभाशुभं वक्तव्यमिति सत्यप्येवं स एव यदि लग्नाधिपतिः स्यात्तर्हि तत्फलघातको न भवति। ईदृग्योगः पुत्रविषये मिथुनलग्ने धनुर्लग्ने च, लाभविषये कन्यालग्ने मीनलग्ने च, सहजविषये मकरलग्ने, शरीरादिविषये कुम्भलग्ने च। एवं जातानां नेतरेषामित्यत ईदृग्योगो मेषमिथुनकन्यातुलाधनुर्मकरकुंभमीनविषयक इति मनस्याधाय फलं विवेचनीयम्—

'अष्टमाधिपतेर्दोषस्तुलामेषे न हि क्वचित्।
अलौ षष्ठपदोषो न वृषभेऽपि न दोषभाक्॥'

इत्युक्तं लोमशमुनिनापि। लग्नाधीशोऽपि चेत्स्वयमित्य-स्यानुवर्तनं न दिशन्तीत्यारभ्य न चेत्स्वयमित्यन्तं, न तत्परतः—

'लग्नाधीशो विलग्नस्थः केन्द्रगो वा यदा भवेत्।
अविशेषेण शुभदो न तत्र क्रूरसौम्यता॥६॥ इति'

अथ त्रिभिः श्लोकैर्ग्रहानुद्दिश्य सौम्यकेन्द्रेशत्वपापत्व-रन्ध्राधिपतित्वप्रयुक्तगुणदोषानाह——

केन्द्राधिपत्येति——न दिशन्ति शुभं नृणां सौम्याः केन्द्राधिपा यदीति प्रागुक्तं तदापाततोऽसंगत एवाभाति । तथापीदृग्विषये संगत एवेति द्योतयति केन्द्राधिपत्वप्रयुक्तदोषो गुरुशुक्रयोस्तु बलवान् । तु शब्दोऽत्र वैषम्यद्योतकः, गुरुशुक्रौ केन्द्राधिपौ चेदत्यन्तमशुभप्रदावित्यर्थः । तयोः केन्द्राधिपतित्वदोषयुक्तयोर्गुरुशुक्रयोर्मारकस्थानसंस्थितिर्द्वितीयसप्तमावस्थितिर्मारकविषये बलवतीत्यर्थः । अत्र यद्यपि——'अष्टमं ह्यायुषः स्थानमष्टमादष्टमं च यत् । तयोरपि व्ययस्थानं मारकस्थानमुच्यते ।' इति वक्ष्यमाणरीत्या द्वितीयसप्तमस्थानाधीशौ मारकौ तदपेक्षया तत्र स्थितावेतौ गुरुशुक्रौ विशेषतो मारकावित्यर्थः । अयं मारकत्वविशेषस्तयोः केन्द्राधिपत्यदोषः प्रसङ्गादुक्तः ।। १० ।।

बुध इति——तदनु तदनन्तरं तयोर्गुरुशुक्रयोरनन्तरं बुधस्तद्विधः, यदि केन्द्रस्वामी बुधो भवेत्तदा तस्य गुरुशुक्राभ्यां किञ्चिन्न्यूनतरो दोषः तदनु बुधापेक्षया चन्द्रः केन्द्राधिपतिश्चेत्स किञ्चिन्न्यूनतरदोषकर्त्ता भवेदिति । न रन्ध्रेशत्वदोष इति अष्टमाधिपतित्वप्रयुक्तदोषः सूर्याचन्द्रमसोर्न भवति, अन्येषामष्टमाधिपतीनामिव सूर्यचन्द्रयोर्दोषावहत्वं न भवति किंतु अतिमन्दतरो दोषः स्यादिति गुर्वाज्ञा । कुजादीनां पञ्चानामष्टमाधिपतीनां दोषावहत्वं सुतराम् ।। ११ ।।

कुजस्येति——भौमस्य कर्मनेतृत्वे शुभकारिता प्रागुक्ता सा त्रिकोणस्वामित्वे सत्येव न तु कर्मेशमात्रेति । अयमर्थः——

यदि लग्नाद्दशमभावेशो भौमो भवेत्तदा शुभफलकारकः स्यादिति प्रागुक्तस्य बाधकोऽयमिति बोध्यम् । कर्मेशो भौमो यदि त्रिकोणस्यापि नेता भवेत्तर्ह्येव शुभफलप्रदो भवति, न केवलं कर्मेशमात्रेति । इत्थं सति कर्कलग्ने जातस्यैवायं सफलः कुंभे जातस्याफलः । अन्येषां तद्भाव इत्यवसेयम् ।

'जीवभृग्वोर्विशेषेण तदनुज्ञस्य वा विधोः ।
केन्द्रेशत्वप्रयुक्तो यो दोषोऽन्येषां न तद्भवेत् ॥
निधनेशप्रयुक्तत्वदोषः पुष्पवतोर्नहि ।
तत्तु तारांवरचराणां विमृश्येति फलं वदेत् ॥'

अन्यदपि—'चन्द्रभानू विना सर्वे मारके मारकाधिपाः ।
षष्ठाष्टमव्ययेशास्तु राहुकेतू तथैव च ॥
खरद्रेष्काणपाश्चैव तथा वैनाशिकाधिपाः × ।
विपत्ताराप्रत्यरीशौ वधभेशस्तथैव च ॥
आद्यन्तयोः खरश्चैव चन्द्राक्रान्तगृहाधिपः ।
जातके मारकाःप्रोक्ताः कालविद्भिर्मनीषिभिः' १२

अथ राहुकेत्वोः स्वतः स्थानाभावात्केनचिन्मुनिनोक्तेऽपि गृहे स्वतः प्रसिद्धगृहस्य स्वाम्यपेक्षयाऽतिदेशिको बलवान्न भवतीति न्यायात्तयोः किं फलदातृत्वमित्याशङ्क्याह—

यद्यदिति—तमोग्रहौ राहुकेतू यद्यद्भावगतौ यस्मिन् यस्मिन् भावे प्राप्तौ यद्यद्भावेशसंयुतौ यस्य यस्य भावस्याधिपतिर्यो ग्रहस्तेन संयुतौ भवतस्तौ प्रबलावतिशयेनान्यापेक्षामपहाय

× वैनाशिकं जन्मभात्त्रयोदशभम् ।

स्वतस्तद्भावफलानि प्रदिशेताम् । यदि स्वसंबन्धिनो ग्रहा बहवस्तर्हि तेषु राहुकेतुसंबन्धिषु ग्रहेषु यो ग्रहो बलवाँस्तत्फलं प्रदिशेताम् । अत्र वीक्षणारूपसंयोगोऽप्यवगम्यते इति मत्त्वा वीक्षितौ वापीति व्याख्यां कुर्वन्ति, अन्योन्याश्रयी वापि च वदन्ति । तदप्यत्र संगतिरतस्तद्भावेशसंगतावित्यपि पाठः साधुस्तेन संगतसंबंधश्चतुर्विधः । अतएवोक्तं वृद्धैः—

'व्यत्याश्रयेण संबन्धश्चान्योन्यालोकसंभवः ।
एकस्य राशौ संस्थित्यां तदीशालोकनादपि ।
सहवासाच्च संबंधा इत्येतेऽत्र चतुर्विधाः ॥' इति

अस्यार्थः प्रायः सुगमस्तथापीषल्लिख्यते—

व्यत्याश्रयसंबन्धो यस्य गृहे यो ग्रहस्तिष्ठति तदीशस्तद्गृहे चेत्स व्यत्याश्रयसंबन्धः (१) ययोर्ग्रहयोः पूर्णदृष्ट्यावलोकनं सदृक्संबंधः (२) यौ ग्रहौ यस्य द्विराशिपस्य यस्य ग्रहस्य राश्योरनवस्थित्या तदीशं स्वराशिगतं पश्यतोऽथवा तदीशस्तौ द्वौ ग्रहौ पश्यति तदान्यालोकसंबन्धः (३) संयोगसंबन्धस्तु सहावस्थितिरेवं चत्वारः संबन्धाः स्युः (४) एवं संबन्धचतुष्टयीति संबन्धचतुष्टयनिदर्शनं त्वत्रैवोपन्यस्यते झटित्युपस्थित्यर्थम् । अथ यदि सूर्यो मेषे भौमः सिंहे अयं व्यत्याश्रयः (१) मेषे भौमस्तुलायां सूर्यः अयं दृक्संबन्धः (२) भौमः सिंहसूर्यौ भौमगृहं विना कुम्भे मीने तिष्ठन् भौमदृष्टो भवत्ययमेकतरालोकसंबंधः (३) एकस्मिन्राशावुभयोरवस्थानं सहवाससंबन्धः (४) ।

'यो व्यस्ताश्रयसंबन्ध उत्तमः स प्रकीर्तितः ।

दृक्संबन्धस्ततो न्यून एकालोकस्ततोऽप्यणुः ।
ततोऽप्येककर्त्तसंबन्धश्चतुर्थोऽपि चतुर्विधः ॥'

इति चतुर्थोऽपि चतुर्विधः अस्यार्थः चतुर्थ एककर्त्तावस्थितिः एककर्त्तावस्थितयोः परस्पराभिमुखत्वम् (१) उभयोः पृष्ठत्वम् (२) न्यूनांशमुखाधिकांशपृष्ठत्वम् (३) अधिकांशमुखन्यूनांशपृष्ठत्वम् (४) तत्कथमिति, अधिकांशस्य वक्रत्वे परस्पराभिमुखत्वम् (१) अल्पांशस्य वक्रत्वेऽन्योन्यपृष्ठत्वम् (२) उभयोर्मार्गित्वेऽल्पांशमुखाधिकांशपृष्ठत्वम् (३) उभयोर्वक्रत्वेऽधिकांशमुखन्यूनांशपृष्ठत्वम् (४) अत्र संबन्धचतुष्टये राहुकेत्वोर्द्वितीयचतुर्थसंबन्धौ तृतीयाविति सार्वजनीनकः ।

यथा सूर्येन्दुभ्यां प्रथमद्वितीयसंबन्धोऽन्येषु प्रथमद्वितीयचतुर्थसंबंधौ राहुकेत्वोर्न तृतीयः ।

योऽडुदायप्रदीपाख्यटीका सज्जनरञ्जनी ।
तस्यां पूर्त्तिमगात्संज्ञाध्यायव्याख्या सुनिर्मला ॥१॥

इति प्रथमोऽध्यायः ।

अथ द्वितीयोऽध्यायः प्रारभ्यते ।

अथ राजयोगान्वक्तुकामः सामान्यतो ग्रहयोगविशेषमाह—

केन्द्रत्रिकोणेति—केन्द्राणि १ । ४ । ७ । १० स्थानानि तेषां पतयोऽधिपा ग्रहाः त्रिकोणपती नवमपञ्चमस्वामिनौ ते केन्द्रत्रिकोणपतयः, तथा च केन्द्रपतिस्त्रिकोणपतिश्चानयोः प्रागुदिताखिलसम्बन्धेनान्योन्याश्रयसहावस्थानपरस्परवीक्ष - णान्यतरवीक्षयोः परस्परं संबन्धो नाम । एतेन केन्द्राधिपानां

त्रिकोणाधिपाभ्यां वा त्रिकोणाधिपतयो: केन्द्राधिपैर्वा संबन्ध इत्यर्थ: । इतरैस्तृतीयषष्ठैकादशाष्टमपतिभिरप्रसक्ता: संबन्धरहिताश्चेत्स्युस्तदा ते विशेषेण शुभफलदायका भवन्तीति केषांचित्स्थानमहिम्न: स्वत: शुभदायकत्वे सत्यपि परस्परसंबन्धाद्विशिष्टफलदायकत्वमस्तीति भाव: । इतरैरप्रसक्ताश्चेत्यनेन स्वकीयभावान्तरदोषोऽप्यवगम्यते । तथा च तद्रहितात्श्चेदित्यर्थ: । तैरितरैस्तृतीयषष्ठाष्टमैकादशस्वामिभि: प्रसक्ताश्चेत्तादृशफलाधिकप्रदा न भवन्ति, किं च तादृशफलाभासमेवाल्पतरस्थितिकं वा कुर्वन्तीति भाव: इतरधात्वनुसारेण विघ्नाकुलत्वं च ॥ १४ ॥

एवं सामान्यतो ग्रहयोगमुक्त्वा सप्तभि: पद्यै राजयोगानाह—

केन्द्रत्रिकोणनेताराविति—एते प्रबला उत्तरोत्तरा इति पूर्वोक्तत्वात् स्वयं दोषयुक्तावपि पुन: साहचर्यादिभिर्दोषैर्युक्तावपि संबन्धमात्रात्सहावस्थानादन्योन्यसंबन्धमात्रेणापि बलिनौ योगकारकौ भवेताम् । अत्रायं भाव:—यदि केन्द्रस्वामी शुभ: स्यादथवा केन्द्राधिपतीनां त्रिकोणस्वामिनोर्वा त्रिषडेकादशाष्टमाद्यन्यतमाधिपत्यमपि चेत्तदाप्यन्योन्यसंबन्धमात्रेण बलिनौ भूत्वा राजयोगकारकौ भवत इति । अत्र संबन्धसत्वे संबन्धेतरासत्वं संबन्धमात्रत्वमिति नियमान्मात्रशब्दोऽवधारणार्थकस्तेन संबन्धमन्तरा न योगकरौ केचित्तु संबंधमात्रपदादन्योऽन्याश्रयसहावस्थानसंबन्धावेव गृह्णन्ति ॥ १५ ॥

अथोक्तात्प्रबलराजयोगमाह—

निवसेतामिति—धर्मकर्मणोरपि व्यत्ययेन चेद्यदि तावुभौ धर्मकर्माधिपती निवसेतां तदा योगकारकौ भवेताम् (१)

उभौ तावनयोर्वैकत्र वा यदि निवसेतां तदापि योगकारकौ (२) अन्यतरः स्वकीयभावे वसेत्तदापि योगकारकौ (३) अत्र त्रयो योगाः संपद्यन्ते, ते च यथा नवमभावेशो दशमे, दशमभावेशो नवमे चेत्तदैको राजयोगः (१) तावुभावेकत्र नवमभावे दशमभावे वा तिष्ठेतां तदा द्वितीयो राजयोगः (२) धर्मेशो धर्मभावे, कर्मेशः कर्मभावे चेत्तदा तृतीयो राजयोगः (३) एते त्रयो राजयोगाः प्रबला ज्ञेयाः । तदुक्तं वृद्धैः—'धर्मकर्मपयोर्धर्मे कर्मण्यन्योन्यभद्वये । स्थितिश्चेत्प्रबलो राजयोगः स्यात्त्रिःप्रकारतः' इति । अत्रानुक्तोऽपि विशेषो वृद्धैरुपबृंहितः तद्यथा—

'धर्मकर्मपयोः केन्द्रे त्रिकोणे स्वोच्चमित्रभे ।
सहावस्थानतो वापि राजयोगो भवत्यसौ ॥
तपःस्थानाधिपो मन्त्री दशमेशो नृपः स्वयम् ।
उभावन्योन्यसंदृष्टौ जातश्चेदिह राज्यभाक् ॥
यत्र कुत्रापि संयुक्तौ तौ वा सप्तमसप्तमौ ।
राजवंशोद्भवो बालो राजा भवति निश्चयम्' ॥१६॥

अथ राजयोगान्तरमाह—

त्रिकोणाधिपयोरिति—त्रिकोणयोरधिपौ नवमपञ्चमेशौ तयोर्मध्ये येन केनापीत्यनेन पञ्चमेशेन नवमेशेन वा केनापीत्यर्थः । बलिनः केन्द्रनाथस्य कर्माधिपतेः, कथमत्र कर्माधिपतेर्ग्रहणं केन्द्रपदेन प्राप्तानां चतुर्णां मध्ये त्रयाणां त्यागे किं मानमिति चेत्केन्द्रनाथपदं विशेष्यं बलीति पदं विशेषणं यतः केन्द्रेषु सर्वापेक्षया बली दशम एवेति प्रबला ह्युत्तरोत्तरा

इति प्रतिज्ञातत्त्वात् । दशमाधिपस्य यदि संबन्धो भवेत्तदा स योगकृद्राजयोगकारक इत्यर्थः । अत्र येन केनेत्युक्तत्वात्कै-मुतिकन्यायेनोभाभ्यां यदि संबन्धस्तदा तदपेक्षयाधिको राजयोगोऽवसेय इति तदुक्तम्—'दशमभवननाथे केन्द्रकोणेशयुक्ते बलवति सतियोगस्तत्र सिंहासनेश' इति । अत्र प्रोक्तयुक्तपदेन संबन्धचतुष्टयी लक्ष्यते । तदुक्तं वृद्धैः—

'धर्मकर्मेशसंबन्धौ लग्नेशेनाथवा भवेत् ।
केवलं वा तयोर्वापि राजयोगोऽयमीरितः' ॥ १७॥

अथ प्राप्तराजयोगे कदा तत्फलपरिपाक इत्यत आह—

दशास्वपीति—प्रायशो बहुधा योगकारिणोर्ग्रहयो राजयोग-कर्त्रोस्त्रिकोणकेन्द्रेशयोर्दशासु दशाविदशादिसंबन्धेन यदा योगो भवेत्तदैव राज्यलब्धिरिति । अत एवोक्तं वराहेण—

'कर्मलग्नयुतपाकदशायां राजलब्धिरथवा प्रबलस्येति'
अन्यदपि—'स्वां स्वां दशामुपगताःस्वफलप्रदाःस्युरिति ।'

अथेदृग्योगाभावेऽपि तत्फलपरिपाककालं पक्षान्तरेणाह—

दशाद्वयीति—योगकारिणोर्द्वयोर्ग्रहयोर्दशा युगपन्न संभव-तीत्यतो दशाद्वये भवत्येव योगकृत्केन्द्रेशदशा योगकृत्त्रिकोण-दशा चेत्यनेन दशाद्वयं द्वित्वं तदस्यास्तीति दशाद्वयी । एवं-लक्षणलक्षितो यस्तदयुक् ताभ्यां केन्द्रत्रिकोणाभ्यां अयुक् अयोगोऽन्योन्याश्रयादिसंबन्धरहितः । स यदि सर्वे त्रिकोण-नेतारास्त्रिषडायाधिपाः शुभाः केन्द्रपतयः पापाश्च प्राक् शुभ-कारिणउक्तास्तेषां शुभकारिणां पश्चाद्दिदशान्तानां भावाधिप-तीनां शुभफलप्रदत्वलक्षितानां मध्यगतः कश्चिद् ग्रहः स्यात्स

यदि योगकारिणोर्द्वयोर्ग्रहयोर्दशासु विदशाप्रदः स्यात्सोऽपि राज्यप्रदः स्यात् । अत्रेत्थं भावः—संबन्धिग्रहान्तर्दशापेक्षया किञ्चिन्न्यूनोऽवगन्तव्य इति ॥ १८ ॥

अथ प्राप्तराजयोगस्य पाककालं शुभानामन्तरेषु प्रोक्त्वा पापिनामपि तत्प्राप्तिज्ञानमाह—

योगकारकसंबन्धादिति—स्वतःपापिनोऽपि तृतीयषष्ठाया-धिपतयोऽपि योगकारकसंबन्धाद्योगकारकस्य ग्रहस्य प्रबल-संबंधेन तत्तद्भुक्त्यनुसारेण राजयोगकारकभुक्तिप्रधानतया योगकारकदशया कृत्वा यौगिकं राजयोगसंबन्धिफलं दिशेयुः दद्युरित्यर्थः । अयं भावः—स्वलक्षणाविधेः पापिनोऽपि ग्रहा राजयोगकर्त्रा ग्रहेण केन्द्रत्रिकोणाधिपाद्यन्यतमेन ताभ्यां वा प्रागुक्तलक्षणसंबन्धचतुष्टयरीत्या प्रबलसंबन्धश्चेद्यदि कुर्वन्ति तदा ते स्वदशायां संयोगकर्तुर्ग्रहस्यान्तर्दशा यदायाति तदैव योगकारकग्रहभुक्तिप्राधान्येन राजयोगफलं दिशन्तीत्यर्थः । ते यदि बहवस्तत्र सर्वापेक्षया यो बलवाँस्तद्दशायां योगकर्तु-र्ग्रहस्यान्तर्दशा यदाऽयाति तत्र सुतरां राज्यलाभफलमवगन्त-व्यम् । अन्येषामीषन्मध्यमबलवद्ग्रहाणां दशासु योगकर्तु-र्ग्रहस्यान्तर्दशा यदाऽयाति तत्र तद्बलानुसारेण राजादिसहायतो यौगिकं फलं भवतीत्यवगन्तव्यम् ॥ १९ ॥

अथ प्राप्तराजयोगप्राप्तिकालं निरूप्य भूयोऽपि योगान्तरमाह—

केन्द्रत्रिकोणेति—केन्द्रपाः १ । ४ । ७ । १० स्थाना-धिपाः त्रिकोणाधिपाः ५ । ९ स्थानेशास्तयोरैक्ये ते सर्वे योग-कारका भवन्तीत्यर्थः । तेन त्रिकोणाधिपयोरैक्ये वृषलग्ने नवमेशदशमेशयोरैक्यत्वेन शनिर्भवति । कर्कलग्ने दशमपञ्च-

मेशयोरैक्यत्वेन भौमः । सिंहलग्ने चतुर्थनवमेशयोरैक्यत्वेन भौमः। एवं तुलालग्ने चतुर्थपञ्चमेशयोरैक्येन शनिः। मकरलग्ने पञ्चमदशमयोरैक्यत्वेन शुक्रः। कुम्भलग्ने चतुर्थनवमेशयोरैक्येन शुक्रः । अतो वृषे शनिः, कर्कसिंहयोर्भौमः, तुले शनिः, मकर-कुम्भयोः शुक्र एतेऽन्यापेक्षामपहाय स्वतो राजयोगकारका भवन्ति । अथायं योगकृद्ग्रहोऽन्यात्रिकोणपतिना केन्द्रत्रिकोणा-धिपत्यप्रयुक्तो यः स्वयं राजयोगकृद्ग्रहो यदि एकाधिपत्यभिन्न-त्रिकोणपतिना संबन्धकृत्स्यात्ततःपरं किं वाच्यं किमपि नेत्यर्थः। अत्रोदाहरणम्—केन्द्रं वृषलग्ने जातस्य दशमं त्रिकोणं नवमं तयोरधिपः शनिः, अन्यत्त्रिकोणं कन्या तदीशो बुधस्तेन बुधेन यदि संबन्धः प्रागुक्तचतुर्थेष्वेकः स्यात्तर्हि वृषे जातस्य प्रबलराजयोगः स्यादित्यनया रीत्या सर्वत्र योजनीयम् । अथवा केन्द्रपतिना नवमपञ्चमाधिपयोरेकोऽपि यदि संबन्धं करोति तावुभौ राजयोगकारकौ भवतः । तत्राप्यन्योऽपि त्रिकोण-पतिर्यदि संबन्धं करोति तत्र परं किं वाच्यम् । एवं द्विकेन्द्राधि-पत्योरेकेन त्रिकोणपतिना यदि संबंधः स्यात्तदा ततोऽप्यधिक-राजयोगः । एवं त्रयः केन्द्राधिपतयश्चैकेन त्रिकोणपेन द्वित्रिकोणपाभ्यां वा संबन्धश्चेत्ततोऽप्युत्कटराजयोगा भवन्ती-त्यभिप्रायः । योगाधिगुण्येन फलागमकत्वमूह्यम् ॥ २० ॥

अथ तमोग्रहौ कथं योगकारकौ भवेतामित्याह—

यदीति—तमोग्रहौ राहुकेतू केन्द्रे वा त्रिकोणे निवसेतां तिष्ठेतां तदा योगकारकौ भवेताम् । एवं विधावपि तमोग्रहौ केन्द्रत्रिकोणानां मध्येऽन्यतरस्य नाथेन संबन्धादेवेत्यनेन केवलं योगकारकौ भवतोऽन्यथा नेति । अयमर्थः—राहुकेतू त्रिकोण-

स्थौ चेत्केन्द्रपतिना केन्द्रस्थौ चेत्त्रिकोणपतिना सह संबन्धा-द्योगकारकौ भवतो नान्यथा, अत्र प्रबलस्थानप्रबलग्रह-संबन्धानुगुण्येन तयोर्विशेषफलागमकत्वमस्तीत्यवगन्तव्यम्। अत्र राहुकेत्वोः केन्द्रावस्थानं युगपद्भवति त्रिकोणावस्थानं तु युगपन्न भवति, इति मनस्याधाय केन्द्रस्थयोस्तयोस्तयोः फलं प्रबलं त्रिकोणस्थयोः किञ्चिन्न्यूनमिति बुद्धिमद्भिरवसेयम्। अत्रान्यतरशब्दान्तिमश्चैव शब्दोऽर्थसंगत्या अन्वयार्थक्रमेण संबन्धशब्दात्पुरःसरो बोध्यः, संबन्धादेव नान्यथेति भावः॥२१॥

अथ राजयोगभङ्गकृद्योगमाह—

धर्मकर्माधिनेताराविति—धर्मकर्माधिनेतारौ नवमदशमेशौ यदि रन्ध्रलाभाधिपौ स्यातां तदा राजयोगं न लभते न प्राप्नोतीत्यर्थः। तयो रन्ध्रलाभाधिपयोः संबन्धमात्रेण केवलं संबन्धेन नरो योगं न लभते। अत्रोक्तमात्रपदस्यान्वयेनान्य-योगकारकसंबन्धाद्योगं प्राप्नोतीत्यर्थः। तेन नवमभावस्वामी स एवाष्टमाधीशोऽपि चेद्भवेत् यो दशमभावाधीशः स एव लाभाधिपोभवेत्तदा राजयोगभङ्गः स्यात्। एवं प्रथमोदितौ भङ्गौ मेषलग्ने मिथुनलग्ने च सर्वदैव भवेतां, वृषलग्ने नवमेशः शनिरष्टमेशो गुरुरनयोःसंबन्धात् कर्मेशःशनिर्लाभेशोगुरुरनयोः संबन्धात्। एवं कर्के नवमेशो गुरुरष्टमेशःशनिः, कर्मेशो भौमो लाभेशः शुक्र अनयोः संबन्धात्, सिंहलग्ने धर्मेशरन्ध्रेशौ भौमगुरू कर्मलाभेशौ बुधशुक्रावनयोः संबन्धात्। कन्यायां धर्मरन्ध्रेशौ शुक्रारौ कर्मलाभेशौ बुधचन्द्रौ। तुले धर्मरन्ध्रेशौ बुधशुक्रौ कर्मलाभेशौ चन्द्रार्कौ। वृश्चिके धर्मरन्ध्रेशौ चन्द्रबुधौ कर्मलाभेशौ सूर्यबुधौ। धनुषि धर्मरन्ध्रेशौ सूर्यचन्द्रौ

कर्मलाभेशौ बुधशुक्रौ। मकरे धर्मरन्ध्रेशौ बुधसूर्यौ कर्मलाभेशौ शुक्रारौ। कुम्भे धर्मरन्ध्रेशौ शुक्रबुधौ, कर्मलाभेशौ भौमगुरू, मीने धर्मरन्ध्रेशौ भौमशुक्रौ कर्मलाभेशौ जीवशनी अनयोः संबन्धात्प्रतिराशौ द्वौद्वौ राजयोगभङ्गौ भवत इति मनस्याधाय धर्मरन्ध्रपयोः संबन्धादेकः कर्मलाभेशयोःसंबन्धादपरो राजयोगभङ्गः स्यात् । अत्र संबन्धाग्रगमात्रशब्दस्य तयोरिति पदस्याग्रगामित्वयोग्यतया सत्यपि तत्संबन्धे अन्ययोगकर्तृसंबन्धेन न योगभङ्ग इत्यवगम्यते ॥ २२ ॥

योऽडुदायप्रदीपाख्यटीका सज्जनरञ्जनी ।
तस्यां पूर्तिमगाद्राजयोगव्याख्या सुनिर्मला ॥

इति द्वितीयोऽध्यायः ।

अथायुर्दायो व्याख्यायते ।

तत्रादावायुषः स्थानं मारकस्थानं चाह—

अष्टमिति—अष्टमं जन्मलग्नादष्टमं स्थानमायुषः स्थानं भवति, अष्टमादष्टमं जन्मलग्नात्तृतीयं स्थानं चायुषः स्थानं भवति तद्वयमायुषः स्थानमितियावत् । अथ च तयोरपि अष्टम तृतीयभावयोर्व्ययस्थानं द्वादशस्थानं जन्मलग्नात्सप्तमाद्वितीय भवनमिति यावत्तन्मारकस्थानमुच्यते सप्तमद्वितीययोर्मारक संज्ञेति भावः । तदुक्तम्—

'शरीरादष्टमं ह्यायुर्मृत्योर्मृत्युश्च जीवनम् ।
मारकं तद्विजानीयादायुर्जीवनयोर्व्ययम् ॥

अत्रोक्तम्—मृत्यौ पापयुते मृत्युर्दीर्घायुः क्रूरयुक्तभे।
तयोर्बलाबलं ज्ञात्वा वदेदायुर्बलं स्फुटम्'॥२३॥

अथ तयोर्मध्ये बलाबलत्वमाह—

तत्रापीति—तयोर्लग्नात्सप्तमद्वितीययोर्मारकस्थानयोर्यदाद्यस्य व्ययस्थानं सप्तमभवनं तदपेक्षयोत्तरं व्ययस्थानं लग्नाद् द्वितीयभवनं बलवत्तरं भवति। अत्र जन्मलग्नादारभ्य गणनया द्वितीयापेक्षया सप्तमस्यैवोत्तरत्वात्तदपेक्षया कथं द्वितीयस्योत्तरत्वमिति चेदुच्यते—आयुःस्थानत्वेन प्रथमतो वीक्षितस्याष्टमस्य व्ययस्थानत्वात्सप्तमस्याद्यत्वं तदपेक्षया द्वितीयपर्यायेण निर्दिष्टस्यायुःस्थानस्य तृतीयस्य व्ययस्थानभूतं द्वितीयभवनमुत्तरं भवति। तस्मादुत्तरोत्तरं प्रबल मिति न्यायेन द्वितीयस्य प्रबलत्वं सिद्धं, अतः सप्तमापेक्षया द्वितीयस्य प्रबलतेति भावः।

तदीशितुरिति—तत्रापीयान् विशेषः—द्वितीयापेक्षया तत्रगता द्वितीयस्थानप्राप्ता ये पापास्तदपेक्षया द्वितीयस्थितानां मध्ये यः पापस्तदपेक्षया द्वितीयेशेन संयुता ये पापाश्चेत्यनया दिशा यथोत्तरं बलिनो भवन्ति। एवं बलवत्तरं ज्ञात्वा तदीशितुर्द्वितीयस्थानस्वामिनो दशाविपाकेषु नृणां मनुष्याणां निधनं मरणं वाच्यम्। अथवा तत्र गता ये पापिनस्तत्र द्वितीये मारकस्थाने गताः स्थिता ये पापिनः पापग्रहास्तेषां दशाविपाके संभवे सति निधनं मरणं वाच्यम्, अथवा तेन मारकेशेन युताः संबन्धिनो ये पापिनस्तेषां दशाविपाके संभवे सति मरणं वाच्यं संबन्धसंभवाभावे न तद्दशायां मरणमित्यभिप्रायः। तदुक्तम्—

'लग्नादस्तं द्वितीयं भवति मृतिपदं तत्र ये पापखेटाः।
तन्नाथेनाथ युक्तास्तदधिपतिदशास्वेव मृत्युं दिशन्ति' २४

तेषामिति—तेषां मारकस्थानस्थितानामभावे व्ययाधीश-संबन्धिनां व्ययाधिपानां दशाविपाकेषु नृणां निधनं भवेत्, तेषामसंभवे साक्षाद्व्ययाधीशदशायामपि निधनं भवेत्, अत्रोक्तेनापि शब्देन व्ययाधीशसंबंन्धिनां पापिनां दशास्वपि मरणं भवेदिति वाच्यम्। इदं सर्वं दीर्घमध्याल्पायुषां भेदेन त्रयाणां त्रैविध्यमतो नवविधं तत्रापि त्रैविध्येन सप्तविंशतिविधं तदपि त्रैविध्येनाष्टोत्तरशतविधं तदपि राशिप्रतिभेदेन षएणवत्युत्तर-द्वादशशतविधं भवति इत्युक्तं बृहत्पाराशरीये। गौरव-भयान्नात्र लिखितम्। सामान्यतो दीर्घमध्याल्पायुषां भेदा जैमिनीयसूत्रभाष्यकृतोपन्यस्ताः सन्ति। किञ्चित्सर्वार्थ-चिन्तामणिकृताप्युपन्यस्ताः तदखिलं तत्तद्वलोक्यावगन्तव्यम्। प्रकृते तज्ज्ञानं कथमिति किञ्चिल्लिख्यते—उक्तं जैमिनीयसूत्र-कारिकायाम्—

'चरे—चरस्थिरद्वन्द्वाः,स्थिरे—द्वन्द्वचरस्थिराः।द्वन्द्वे—स्थिरो भय-चरा दीर्घमध्याल्पकायुषः॥' तत्सर्वमायुः पितृदिनेशा-भ्यामित्युपक्रम्य संवादात्प्रामाएयमित्यन्तैः सूत्रैः सम्यक् प्रतिपादितमस्ति। तदपवादोऽप्युक्तो द्वितीयाध्यायस्य द्वितीय-पादे, पुनस्तृतीयाध्यायस्य प्रथमपादे तदपवादारिष्टसंभवासंभवोऽतिविस्तरेण प्रपञ्चितोऽस्ति। सर्वार्थचिन्तामणिकृताऽन्य-पक्षमपहायेषदुक्तयेद्गुक्तं—तद्यथा—

'अल्पायुर्लग्नपे भानोः शत्रौ मध्यं तु मध्यमे।

मित्रे लग्नेश्वरे तस्य दीर्घमायुरुदाहृतम् ॥'

तेन सिंहराशौ जातस्य सदैवामितायुः स्यादिति भात्यतोऽयं विचारो दिवाजातस्य लग्नेशसूर्ययो रात्रिजातस्य लग्नेशचन्द्रयोरिति वदन्ति केचन तदपि न समञ्जसं, रात्रिजातस्य कर्कलग्ने तादृगेव स्यादतः फलादेशाय ग्रहाणां शत्रुराशयो वृद्धैरुक्तास्ते च यथा—

'सितासिताश्च युग्माश्च सूर्यस्य रिपुराशयः ।
कौर्पितौलिघटाश्चेन्दोर्भौमस्य रिपुराशयः ॥
घटमीननृयुक्तौलिकन्या ज्ञस्य ततः परम् ।
कर्कमीनालिकुम्भाश्च राशयो रिपवः स्मृताः ॥
वृषतौलिनृयुक्कन्या राशयो रिपवो गुरोः ।
सिंहालिकर्कचापाश्च शुक्रस्य रिपुराशयः ॥
मेषसिंहधनुःकौर्पिकर्कटाः शनिशत्रवः ॥'

एवं सर्वेषां ग्रहाणां राशिं ज्ञात्वा शत्रुसंयोगे स्वल्पायुस्त्वमित्युक्तं तदेव विशदीकृत्योक्तं केनापि तद्यथा—

'सूर्येज्यमित्रं समभं सितेन्दुजे-
न्दूनां शनिद्विड्भवनं कुजस्य यत् ।
अर्केज्ययोर्द्विट् सममिन्दुभौमयोः
शनिज्ञयोर्मित्रभमास्फुजिद्गृहम् ॥
दिनेशभं वै सितसौरयोर्द्विषन्
मित्रं परेषां न समोऽस्य कर्हिचित् ।

चन्द्रारशुक्रार्किसमं दिशारयो-
र्हितं हितं देवपुरोधिसंभवम् ॥
मित्रं सितेन्द्वर्कभुवां कुजेज्ययो-
ररिर्दिनेशस्य समं बुधगृहम् ।
ज्ञार्क्यास्फुजिद् द्विट् हितकृद्रवीज्यभू-
भुवां निशानाथनिकेतनं स्मृतम् ॥
सितस्य मित्रं त्वहितं रवेस्तु समं परेषां रविजस्य सद्म ।
स्वर्क्षत्रिकोणोच्चविनिम्नभानि ज्ञात्वा वदेत्खेटबलं स्वबुद्ध्या ॥
एवं ग्रहाणां हितमध्यशत्रुसंयोगतो दीर्घसमाल्पमायुः ।
ज्ञात्वा पृथक् तद्युतितोऽवशिष्टं दीर्घं समं चाल्पमुदीरयेद्वै ॥'

अत्रायुर्भेदास्त्रिविधाः—

द्वात्रिंशद्वर्षमल्पायुर्मध्यमायुस्ततो भवेत् ।
चतुःषष्ट्या पुरस्तात्तु ततो दीर्घमुदाहृतम् ॥

इत्यनेनाल्पायुःप्रमाणं ३२ मध्यायुःप्रमाणं ६४ दीर्घायुर्मानं ९६ ॥

अन्यच्च—

षट्त्रिंशात्पूर्वमल्पायुर्मध्यमायुस्ततः स्मृतम् ।
द्विसप्तत्याः पुरस्तात्तु ततो दीर्घमुदाहृतम् ॥

इत्यनेनाल्पमध्यदीर्घायूंषि ३६।७२।१०८

चत्वारिंशाब्दतः पूर्वमल्पायुश्च ततोऽधिकम् ।
अशीत्यब्दावधि प्रोक्तं दीर्घं तदधिकं विदुः ॥

इत्यनेनाल्पमध्यदीर्घायूंषि ४०।८०।१२० अतो योगिन्यामल्पादि २८।६४।१००, बृहति ३६।७२।१०८, अष्टोत्तरी २५।५१।८७ बृहति ३६।७२।१०८, विंशोत्तरीयेऽल्पे २०।६०।१००, बृहति ४०।८०।१२० भेदाः शास्त्रे उपन्यस्ताः सन्तीति कथमीदृगिति शङ्कानिवृत्तिर्गणिताद्भवत्येवेति दिक् ॥ २५ ॥

अलाभ इति—

एते तेषां पुनर्व्ययेशव्ययस्थितव्ययेशसंबन्धिनां पापिनामलाभे व्ययेशितुः संबन्धेन व्ययाधीशस्य संबन्धेन शुभानां च योगकारकव्यतिरिक्तशुभग्रहाणां दशासु क्वचित्कदाचिन्मरणं वाच्यम् । क्वचिदिति भिन्नक्रमः ।

अथैषामलाभे चकाराच्छुभानामप्यसंभवे अष्टमेशदशासु जन्मलग्नतोऽष्टमभावपतिदशासु क्वचित्कदाचित्स्यादित्यर्थः । मरणमितिशेषः, अष्टमेशस्याप्यलाभेऽष्टमस्थाष्टमेशसंबन्धिनां पापिनां दशासु मरणमिति केचिन्नव्याः—

अत एवोक्तम्—

'धनेशतत्स्थारिगपापयोगा जायेशतत्स्थारिगपापयुक्ताः ।
षष्ठाष्टमद्वादशभावनाथास्ते हेतवो मृत्युफलस्य चोक्ताः ॥'

अन्यदपि—

'यो लग्नाधिपतेः शत्रुर्लग्नेशान्तर्दशां गतः ।
करोत्यकस्मान्मरणं सत्याचार्यमतं त्विदम् ॥

अन्यच्च—

'राह्वारयोश्चारशन्योश्चार्कशन्योर्ज्ञचन्द्रयोः ।
शुक्रेज्ययोः समायोगे दशारिष्टं विदुर्बुधाः' ॥ २६ ॥

केवलानामिति । मारकलक्षणलक्षितानामदर्शनेऽनागमे केवलानां पापानां मारकसंबन्धरहितानामपि पापानां दशासु कदाचिन्मरणं कल्पनीयम्, अयं भावः यस्य जन्मनि प्रागुक्त-मारकलक्षणलक्षितो ग्रहो न दृश्यते स केवलपापी न केनापि प्रकारेण सत्फलदो यो ग्रहस्तस्यैव दशायां कचिन्मरणं वाच्यम् । तदुक्तम्—

'शून्याध्वगः पापखगः पापान्तस्थोऽरिगेहगः ।
नीचगो वा मारकः स्यान्मारकाणामदर्शने' ॥२७॥

मारकैरिति । अथ यस्य द्वौ त्रयो वा मारकास्तत्रेयान् विशेषः—पापकृदित्यनेन पापलक्षणलक्षितः शनिर्मारकैः सह संबन्धादितरमारकान् सर्वानतिक्रम्य स्वयमेव निहन्ता भवतीत्यर्थः, अत्रैवकारो निश्चयार्थः । इतरान् सर्वानित्यनेन सापेक्षया पूर्वमागतान् पश्चाच्चागन्तुयोग्याननेकान्मारकानतीत्य स्वयमेव शनिर्निहन्ता भवतीत्यनेनान्यमारकापेक्षया शनेः प्राबल्यं दर्शितं, पुनश्च न संशय इत्यनेनास्मिन्नर्थे संशयो नास्तीत्यर्थः । अत्रोपात्तातिक्रम्येतिशब्देनाक्रमणं कृत्वेत्यर्थोऽतः शनेरपेक्षया पूर्वमारकानातिक्रमणं कृत्वा तत्तन्मारकदशान्तर्दशासु प्राप्तो यो रोगस्तेनैव रोगेण तन्मारकदशान्तर्दशाप्राप्तं कालमतिक्रम्य स्वदशान्तर्दशासु शनिरेव मारको भवतीति ज्ञेयं बुद्धिमद्भिरिति ॥ २८ ॥

अथात्र त्रिविधासु दशासु विंशोत्तरीदशैवग्रन्थकृता स्वीकृतास्तीत्युक्तम् । सा च विंशोत्तरी त्रिविधा—

आद्यस्यैवानुपातः (१) सर्वेषामनुपातः (२) सर्वेषां त्र्यंशेनानुपातश्चेति (३) तद्यथास्यैव—

'आद्यदशाधिपवर्षविनिघ्ना भुक्तघटीखरसैः६०परिलब्ध्वा ।
आद्यदशाधिपवर्षविशुद्धा वर्षमुखा खलु वर्षदशा स्यात्॥'

सर्वेषामनुपातो यथा—

'जन्मोडुभुक्तघटिकाः खार्कघ्नाः खनवोद्धृताः ।
खार्कशुद्धाः परायुः स्यात्प्रोक्तेयं परमायुपि ॥' इति

दशाक्रमः पराशरजातके—

'रवीन्द्वाराहिजीवार्किबुधकेतुसिताः क्रमात् ।
आग्नेयाद्धदशेशाः स्युः स्वामिनां वत्सराः क्रमात् ॥
षट्दशसप्तधृतयो नृपा एकोनविंशतिः ।
अत्यष्टिः सप्त च नखाः सूर्यादीनां च वत्सराः ॥'

तदेव विशदीकृत्योक्तं गौरीजातके—

हिताय सर्वसत्त्वानां जातकं ब्रूहि शंकर ।
आयुर्दायविधानेन दशाफलक्रमेण च ॥
एवमुक्तस्तु पार्वत्या शंकरः प्रत्यभाषत ।
उवाच वचनं प्रीत्या शृणु पार्वति निर्णयम् ॥
नवग्रहा इमे ख्याताः सूर्यसोममहीसुताः ।
राहुः सुरगुरुः सौरिः सौम्यःकेतुः सितस्तथा ॥

एते प्राणभृतामायुः प्रयच्छन्ति वरानने ।
षड्वर्षाणि दिनेशस्य दश चन्द्रस्य सुव्रते ॥
सप्तवर्षाणि भौमस्य राहोरष्टादशैव तु ।
गुरोः षोडश विज्ञेयाः सौरस्यैकोनविंशतिः ॥
सप्तदशबुधस्योक्ता सप्तकेतोश्च वत्सराः ।
विंशतिर्भार्गवस्योक्ता दशा भुक्तिक्रमेण तु ॥
शतं विंशतिसंयुक्तं परमायुः प्रकीर्तितम् ।
नवर्क्षाण्यग्निभाद्यानि त्रिरावृत्यानि सुन्दरि ॥
अधोऽधः स्थापयेत्कोष्ठे नवके विमलानने ।
संस्थाप्य तदधः सूर्याच्छुक्रान्तान्नव खेचरान् ॥
दशाफलानि क्रमशो दैववित्सम्प्रुदादिशेत् ।
आद्यस्यैवानुपातोऽयं मुख्यपक्ष उदाहृतः ॥
